यो वित्त भाजनतयापि धनापिपाना-
ञ्चित्तज्ञताधिकतयाधिक बुद्धिभाजाम् ॥ 17
सद्भूतसत्त्वगुणरागितया नितान्तं
त्राणीय सत्त्वनिचयस्य परायणो यः ।
नित्यं स्वकीयहृदयार्प्पितधर्म्ममार्ग्ग-
न्नित्यान्वगाद्गुणकलापकलानिवासः ॥ 18
सोऽस्थापयत् सुमहतीज्जिनमूर्त्तिमेक
श्रीवज्रपाणि सहितामपि दिव्यदेवीम् ।
प्रासादहर्म्यनिवहे स्वहृदीव दिव्ये
बौद्धोऽग्रधीश् शरणगाष्टमिस्र भक्त्या ॥ 19
जयन्तदेशे जिनरूपमेकं
सोऽस्थापयन् मूर्त्तिरसाष्ठशाके ।
कुटीश्वरे सोऽपि च लोकनाथ-
न्देवीद्वयं नेत्रनगाष्ठशाके ॥ 20
श्रीमन्महेन्द्रगिरिमूर्द्धजतीर्थजाते
स्वच्छे विशुद्धपरिखाम्भसि मङ्गलार्हे ।
अल्पेऽप्यनल्पफलदायिनि तेऽत्र सर्व्वे
मा स्नासिषुर्द्विजवरेण विनैव होत्रा ॥ 21
विस्तारित द्विशतयुक्तचतुःशताग्रा

यामेपि सत्त्व निवहस्य हितार्थनीरे ।
तीरामिधातकरणं द्विपवृन्दमेव
मा रोपयन्तु नियतं सततन्तटाके ॥ 22
यद् यज्वना दत्तमिदं स्वपुण्ये
तदत्रदेशे विबुधे न हार्य्यम् ।
द्रव्यं सरैराजतकिङ्कराढ्यं
सुखार्थिमिर्य्यैरूभयत्र लोके ॥ 23
इति वदति स वाणी सत्यधर्म्मानुवृत्तां
सकलजनगणांस्तान् धर्म्मसद्वृत्तिभाजः ।
यदिह तु निजपुण्यं स्वान्मना रक्षणीयं
तदपि च परपुण्यं यत्नतः पालयन्तु ॥ 24

II

बुद्धो बोधीं विदध्याद्वो येन नैरात्म्यदर्शनम् ।
विरुद्धस्यापि साधूक्तं साधनं परमात्मनः ॥ 25
श्रीवज्रपाणिख्याद् वश् श्रीमद्वाहुर्ब्बिभर्त्ति यः ।
श्रीपालननित्रजगतश् श्रीवज्रं वज्रिवज्रवत्॥ 26
प्रज्ञापारमिता पातु पातकाद्वो वरीयसः ।
बुद्धसर्व्वज्ञमावेन्दीः पौर्णमासीव पूरणीः ॥ 27
आसीद्राजेन्द्रवर्म्मेति राजेन्द्ररजनीश्वरः ।
श्रीमान् रसर्त्तुवसुमिर्मूषितात्मीय मण्डलः ॥ 28
वाल्ये विजित्य कन्दर्प्प दूर्पं सौन्दर्य्यसम्पदा ।
यौवने तु जिगीषन्तं यो जिगाय पुनर्धिया ॥ 29
विधाराकानुरक्तं यं भेजिरे सकलाः कलाः ।
कम्बुविश्वम्भराजवंशाम्बर निशाकरम् ॥ 30
विसर्प्पिषड्गुणरसेस् सकीर्त्तीन्दुजयामृतैः ।
भूषितो यश् शुभारम्भैरूदन्वानिव वारिभिः ॥ 31
जयामृतरसाद्रङ्घ्रि यशः कौस्तुमभासुरम् ।
प्रत्यक्षमरविन्दाक्षं लक्ष्मीर्य्यं शिश्रियेऽनिशम् ॥ 32
रजसा जृम्भितेनापि सान्द्रे तमसि दर्शिते ।

विवृद्धं यस्य यात्रायां सत्त्वन्न प्रकृतेरिव ॥ 33
विहिते वेधसा शङ्के यस्य वक्त्रेन्दुमण्डले ।
जातं प्रत्यक्षमभ्रान्तञ्चन्द्रद्वितय दर्शनम् ॥ 34
राजसिंहोऽपि वैरीन्द्रकरीन्द्र कदनादरी ।
सिंहावलोकितन्यायन्नाद्याद् युद्धाद्रिभूर्द्धिन यः ॥ 35
सन्यापसण्यदोम्मुक्तिमार्ग्गणार्व्वुद्मर्ज्जुनम् ।
द्रुतन्द्विषद्रबं वीक्ष्य यं कौरवविवर्द्धितम् ॥ 36
यस्यारिर्मण्डलाग्रेण कृत्तमूर्द्धापि संयुगे ।
केनापि मण्डलान् मुक्तो भास्वन्मण्डलभन्वगात् ॥ 37
यस्तकीर्त्तिर्द्दिगन्नाय गन्त्री गीत गुणोदया ।
दिगीन्द्रलक्ष्मीहरिणीं लालयन्तीय लिप्सया ॥ 38
साधुशब्दप्रयोगार्ध्ये यस्य राष्ट्रे न गीरियं ।
देहीति मध्यमे प्यासीत् पुंसि किं पुनरुत्तमे ॥ 39
यस्योर्व्वी बिभ्रतस् सर्व्वां सर्व्वोभूमृन्नु मूर्द्धभिः ।
बभार भूमृद्भावप्त्यै केवलाङ्घ्रि रजोमयीम् ॥ 40
त्रिलोकीं कीर्त्तिवीथीं यस् समीकर्त्तुमना इव ।
बाहुवीर्य्येण विदधे भूमृदर्व्वुदमर्द्दनम् ॥ 41
श्रुतिमण्डितमाधुर्य्यो धुर्य्यो धर्म्मानुशासने ।
यस्याभ्युदयकृन्नृणां निदेशोऽर्घ्यो मनोरवि ॥ 42
खण्डेन्दुदीपितं शम्भोर्भिन्नमैश्वर्य्यमष्टधा ।
यस्याभिन्नन्तु सर्व्वत्र कीर्त्त्यखण्डेन्दुदीपितम् ॥ 43
यशोधरतटाकस्य मध्येऽतिष्ठिपदैश्वरम् ।
यो लिङ्ग शार्ङ्गिगौरीश कुशेशयभवैस् सह ॥ 44
चम्पादि परराष्ट्राणां दग्धा कालानलाकृतिः ।
तेजसां विसरो यस्य जाज्वलीति ककुम्मुखे ॥ 45
त्रैलोक्यमन्दिरे हेमशैलाग्रशयनोज्ज्वले ।
लक्ष्म्यास्तनोति सुरतं यत्कीर्त्तिर्म्मणिदीपिका ॥ 46
येनोत्तरायनार्द्धेऽपि यज्ञे दत्ताः धनाधनाः ।
मधोनेवर्त्विजाज्जाताः दक्षिणा दक्षिणायने ॥ 47

सप्रत्ययाः प्रकृतयो योग्यास् स्वार्थपरार्थयोः ।
प्रकाशने कृता यस्य वचसा पाणिनेरिव ॥ 48
संक्रान्तयोगनिद्रेव संश्रिताब्धौ चिरं हरिम् ।
श्रीरशेतानिशं यस्य वक्षस् स्फटिकमन्दिरे ॥ 49
तदीयोऽनुचरश्चारूचरिताचाररञ्जितः ।
श्चकवीन्द्रारिमथनो मथितारातिराहवे ॥ 50
काञ्चीकरङ्ककलश प्रमुखैर्भोग विस्तरैः ।
सत्कृतः कम्बुजेन्द्रेण भर्त्त्रायो गुणगौरवम् ॥ 51
पाणिस्पर्शेन यो मूर्द्धि राज्ञा दत्तवरस् स्वयम् ।
सिद्धिं लेभेऽरिमर्द्दादिराजकार्य्ये नियोजितः ॥ 52
प्रविसंवादिबुद्धस्य स्वार्थ विज्ञान पूर्व्वकम् ।
वाक्यं येनानुराशिष्टं स्वान् परेभ्यान् प्रयच्छति ॥ 53
बुद्धिदिव्यस्वभावेन बद्धवा तादात्म्य लक्षणम् ।
सम्बन्ध यस् स्वमनसो योगिज्ञानभवाप्तवान् ॥ 54
जयन्तदेशे विजयी जिनमेकमतिष्ठिपत् ।
देवीद्वितयसंयुक्तं धो बुद्धञ्च कुटीश्वरे ॥ 55
धर्म्ममार्ग्ग प्रमाणेन मानिनामग्रयायिना ।
तेनात्र स्थापिता देवीबुद्धश्रीवज्रपाणयः ॥ 56
प्रादात् प्रासादसद्नानि निजहृत्पद्मतःप्रति ।
स स्थित्यै स्थापित सुरे कृत्येमान्यपराण्यपि ॥ 57
अत्रेदमनुकर्त्तव्यं सतान्तेन मनस्विना ।
राज्ञो विज्ञापिस्येति शासनं सुरमन्दिरे ॥ 58
वसूनि खानिदेवानि नैव हार्य्याणि साधुभिः ।
असाधवश्च निग्राध्या भूपैस्तानि जिहीर्षवः ॥ 59
तरूरेकोऽपि रूदोऽस्मिन्नोच्छेद्यश्छाययान्वितः ।
किं पुनगृहदारूणि सुखदानि सुखार्थिनाम् ॥ 60
शीलगोपायनपराः परार्थस्थिरबुद्धयः।
वास्तण्यास्तदृशाश् शान्ता भिक्षवोऽस्मिन् समाधिना ॥ 61
महात्यां विधिश्वातायां परिखायां शुभाम्भसि ।

विप्राहते वेदविदस् स्नातव्यन्नात्र कैश्चन ॥ 62
तटाकेऽस्मिन् तटरूहैस्तरूमिश शीतलाम्भसि ।
गजानां मञ्जनं माभूत स्याच्चेद्रवार्य्यन्दयालुभिः ॥ 63
इति नृपतिवचांसि तेन मूर्द्धि
प्राणिहितानि हितानि सज्जनानाम् ।
ललित विरचिताक्षरैरिहैभिः
प्रविलिखितान्य विलङ्घयतां भजन्ताम् ॥ 64

III

बुद्धो विराजति समग्धिसभित्समृद्ध-
वैराग्यहेतिनिहतारिपमारवीर्य्यः ।
योऽवाप्य बोधिमविनश्वरराज्यलक्ष्मी-
न्निर्व्वाण मन्दिरवरे रमतेऽधिराजः ॥ 65
श्रीवज्रपाणिखतान्महतां विभूतिं
यो द्विग्मदापकृतिकल्यमकुन्ठिताग्रम् ।
वज्रं वहन् प्रहसतीव सहस्रनेत्रं
संग्रामवैरिमदकुण्ठितबन्ध्यवज्रम् ॥ 66
प्रज्ञापारमिता विभाति भुवनाम्भोजोदयश्रीकरी
कलाकार महान्धकारमथनी भूतार्थ सम्बोधिनी ।
या लीलामपि मण्डलस्य दधती निर्व्वाणबीथीरवे-
रभ्रान्ता रुचिमातनोत्यपिहितान्नकृन्दिवं भास्वतीम् ॥ 67
आसीत् सषड्सैश्वर्य्यान्धर्म्माढ्यां वसुधान्दधत् ।
श्रीमद्राजेन्द्रवर्म्मेशः पृथुवत् पृथुविक्रमः ॥ 68
दग्धे स्मरे निरास्थानशोकानलशमादिव ।
निमग्नानङ्गकान्तिर्य्यत् तनुकान्तिसुधाम्बुधौ ॥ 69
त्रैलोक्यलक्ष्मीमालोक्य सेर्ष्या यस्याङ्गसङ्गिनीम् ।
इन्द्रादीन बोधयन्तीव कीर्त्तिस् स्त्री हशदिगद्रुता ॥ 70
इनमण्डलसन्तापपटुना यस्य तेजसा ।
सन्तापित इवाद्यापि पिबत्यर्क्कः करैश्यः ॥ 71
पटुप्रतापतप्तान् यः पद्मारूढः प्रजापतिः ।

कीर्त्तिदुग्धाम्बुधौ नम्रान्राजहंसान्यमज्जयत् ॥ 72
विक्रमाकान्तभुवने श्रीधरे सर्व्वदेवताः ।
मुदिता बलितः क्षीणाद् विवृद्धादेव यत्र तु ॥ 73
श्रीराजसिंहमहिषी श्रिता शून्याप्यरेः पुरी ।
सराज्यलीलेव भिया यतो न्वन्तर्द्दधे वने ॥ 74
तेजोभिर्भास्वता येन कर्त्रापि भुवनद्युतिम् ।
याने केनापि सर्व्वाशा बलधूल्यान्धकारिता ॥ 75
रत्नसिंहासनगिरिं राजसिंहेऽधिरोहति ।
यास्मिन् वीर्य्येण संत्रस्ताः प्रणेमू राजकुञ्जराः ॥ 76
ज्यायां सन्द्विषतीव श्रीःकृष्णं निद्रानुरागिणम् ।
नित्यबोधिनी शुभाङ्गे यूनि यत्रानुरागिणी ॥ 77
षाणारि विजयश्रीद्धमनिरुद्धबलोद्धुरम् ।
मुरारिमिव दिग्राजा यमजय्यं युधीडिरे ॥ 78
भुवनोदयसंवर्द्धसामादिविधिशालिनी ।
दिगिन्द्रमूर्द्धविधृता यस्याज्ञेन्द्र गुरोरिव ॥ 79
यस्य चक्री गदी शङ्खी धरणीवर सन्निधिः ।
युधि द्विट्श्रीकचग्राही विष्णोरिवभुजौवभौ ॥ 80
योऽङ्ग सौन्दर्य्यदुग्धाब्धौ धौतं पूर्णेन्दुमण्डलम् ।
व्यङ्कपङ्कन्...रम् लक्ष्मीभास्वरं वदनन्धौ ॥ 81
राजानां द्यु...वेन्द्रा जिताद्राजं विभीषणे ।
प्रे......थ् नी योऽदाद्राम इवापरः ॥ 82
मखानलो............महामहिषमण्डले ।
यस्य...........कीर्ण्णे कल्यश्वःक्वापि विद्रुतः ॥ 83
एकेन सकलं क्रान्त्वा भुवनं विक्रमेण यः ।
श्रमग्दिवाङ्घ्रि सान्निध्यं भूभृतां मूर्द्धनि व्यधात् ॥ 84
..........................................ङ्घ्रि नीरजम् ।
.........................................ण्डलश्रियः ॥ 85
..........................................दिलीपवत् ।
.........................................निर्ज्जितात् ॥ 86

..........................................मभृद् ध्रुवम् ।
मेरु....................................येन सिज्यति ॥ 87
राजेन्दु.......................( यशोधर ) पुराम्बुजम् ।
श्रीभिः................................षडुदयं पुनः ॥ 88
यशो( धरतटाकस्यमध्ये ) श्रीद्धेधराधरे ।
मेराविव.....................न् समतिष्ठिपत् ॥ 89
श्रीरम्भोधि चि............पशमादिव ।
आश्रयद् यामिन...............कोज्ज्वलमण्डलम् ॥ 90
धर्म्मादिवाश्रिता यास्मिन्नधर्म्मेण विरोधिनः ।
निःश्रेयसाम्युदययोस् सिद्धिं लोकाः प्रपेदिरे ॥ 91
युद्धे द्वाभ्यां द्वयोर्य्योगे वल्लभे द्वे द्रुते इयम् ।
पद्मया यस्य कीर्त्तिस् स्वर्व्विपत्यारेर्व्वधूर्व्वनम् ॥ 92
हिरण्यक शियुश्रीभिर्व्वियुक्तः भुवनं व्यधात् ।
नृसिंहो यस्तु विपुलं विचित्रञ्चरितं सताम् ॥ 93
अब्धिन्देवैर्म्मधित्वैका स्वार्थाश्रीश् शौरिणा हृता ।
युद्धाब्धिं सुहृदर्थापि समस्तैकेन येन तु ॥ 94
चारश्चन्दौजसस्तस्य भक्त्याङ्घ्रौ बद्धयाबभौ ।
श्रीकवीन्द्रारिमथनश् श्रियारूण इवाम्बुजे ॥ 95
चतुर्भिश्चतुरोपायैर्यशस्कर विवेकिनी ।
धर्म्यर्थिसिद्धिकर्त्री यद्बुद्धिर्नीतिरिवाबभौ ॥ 96
बौद्धधर्म्मैकतानो यो बौद्धानामग्रणीरपि ।
केनापि भूपतौ भक्तिर्न्नद्धास्मिन् परमेश्वरे ॥ 97
यशोधरपुरे रम्यं मन्दिरं विबुधप्रियः ।
शिल्पविद् विश्वकर्म्मेव योऽनेनेन्द्रेणकारितः ॥ 98
प्रेरणे सर्व्वलोकस्य यश् शैलादिकृतौकृती ।
यशोधरतटाकस्य मध्ये राज्ञा नियोजितः ॥ 99
संसाराण्र्णवमोचनं प्रणयिनान्निर्व्वाणसौख्यं यशः ।
शुभ्रन्दीपितदिङ्मुखं सुगमनं बन्धोश्चलोकद्वयम् ।
प्रज्ञापारमितात्र तेन विदधात्येतान्यधिष्ठापिता

कम्येकं हि सतान्तनोति वहलं सर्व्वं फलं बन्धुरम् ।। 100
नित्य बद्ध निवासेन वीतरागेण बन्धुरम् ।
प्रासादमण्डलं योगी स ह्न्नीरजवद्र व्यधात्।।101
स्वच्छेन पावनेनाप्तां पयसा परिखामिमाम् ।
यथा निर्व्वाणसंप्राप्तिं ज्ञानेन स विनिर्म्ममे ।। 102
सर्वसत्वाभिनन्दार्थन्तटाकं महतां मतम् ।
स यथा चरितं बौद्धं विदधौ धर्म्मवर्द्धनम् ।। 103
राजहंसावगाहार्हे पुण्ये राजपुरोहितः ।
स्नायकाः परिखानीरे विप्रा एवेतितन्मातिः ।। 104
तटाकवनतस्तस्य मातङ्गास्तटभङ्गिनः ।
साधुसिंहैर्न्निरूध्यन्तान्धर्म्मकेसर भासुरैः ।। 105
अनवरतविनाशानीत पायान्धकार-
श्चतुरद..................शेष लोकं ।
रविमिव विदधानं पुण्यपद्मोदयर्द्धि-
न्नम्........जनं.........नु भावीं ।। 106
शिवाच्युताभिधानेन.................।
प्रासादे.....................प्रद्मनबन्ध... ।। 107

**अर्थ–**

पुनः-पुनः अतिशयता से जीतें (जय होवे) दूसरों का कार्य करना है जीविका जिसकी.. । निःस्वार्थ आत्म त्याग से किया है सब सर्वज्ञता को, अपने हर्ष को अतिशय शान्त रूप में प्राप्त किया ।। 1

लोकेश्वर जीतते हैं, उनकी जय होती है । सभी उत्कर्षों के समान विद्यमान हैं । लोकों के हित के लिए जन्म लिया । चार आर्यसत्य सम्यक् दिखाते हुए धर्म की स्थिति को अत्यधिक स्थिर चरण होकर धारण किये हुए सारे विश्व की समृद्धि के लिए जो चतुर्भुज की प्रदीप्ति को जो राजा या श्री विष्णु भगवान् (दोनों पर सभी विशेषण हैं)– यहाँ राजा के विष्णुवत् राजा का भी वर्णन है । द्वयर्थक श्लोक श्लेष अलंकार है ।। 2

श्री इन्द्र जो किसी से हारनेवाले नहीं अतएव 'अजित' हैं जिन्होंने जम्भ

नामक असुर को मारा था । अतएव उसके वैरी हैं । जलते हुए वज्र की जलन समान प्रकाश धारण करते हैं । उद्दण्ड गर्वी कलियुग दानव के दोषों के खण्डों से चूने से सम्यक् क्षुभित विघ्नों के नाश करने में निपुण श्री इन्द्र जी हैं ।। 3

समस्त विश्वरूप समुद्र के सार रत्न, या रत्नों के सार ताराओं की फड़कती किरणों से रंगी हुई (रमणीय) पीढ़ी जिस पर राजा पैर रखता है जिसे पादपीठ कहते हैं– ऐसा राजा था चन्द्रवंशोत्पन्न शत्रु के रस रूप मंगल पृथिवी के राजा श्री राजेन्द्रवर्मन अपने अंगों के प्रकाश बिखरनेवाले जिनके अंगों के प्रकाश विश्व में बिखरे थे– ऐसे श्री राजेन्द्रवर्मन हैं ।। 4

जिसके दोनों चरणकमल लक्ष्मी से पुनः-पुनः अतिशय रूप से स्पर्श किये गये हैं, सिंहासन प्रकाशित रत्नों की किरणों रूप जल में चरणकमल जँभाई ली है- पैरों पर प्रणाम करनेवाले राजा के मस्तकों की मालाओं के माणिक्य जो करोड़ों की संख्या में हैं उनकी किरणें माणिक्यों की किरणों से नयी लालिमा से युक्त है ।। 5

लक्ष्मी जी त्रिलोकी स्त्रियों में सुन्दरी स्त्रियों की सबसे ज्येष्ठ बहन हैं । बहुत बार देवों और दानवों के समूहों से सब ओर से पीड़ित अंगोंवाली दुखिनी विन्ना सी जिस सुन्दर अंगों रूप रंगों में शोभा रूप अमृत को सम्यक् सब ओर से मानो पीने के लिए ही सब ओर से डूबी हुई हैं, मग्न हैं ।। 6

त्रिलोकी की रक्षा की विधि में चतुर जिसके हाथ में रख करके ब्रह्मा, विष्णु, महेश ये त्रिदेव हैं एक ही पर गुण भेद से रजोगुण, सत्त्वगुण, तमोगुण– इन तीनों से युक्त हैं। 'एकोदेव त्रयीमूर्ति ब्रह्मा विष्णु महेश्वरा:' एक देव हैं तीन मूर्तियाँ हैं– आकाश में, स्वर्ग में कमल या अम्बुजा लक्ष्मी के कमल से महान् उज्ज्वल चक्र और शूल– सभी समाधि के सुख के लिए संयमी होकर रमण करते हैं ।। 7

जिसकी आज्ञा से अत्यधिक रूप से उल्लंघनीय नहीं है दूसरे राजाओं से बल्कि दूसरे राजा लोगों के धैर्य और धाम इस राजा से नीचे ही हैं । आत्मा की उन्नति की प्रतिमा के अनुकरण की इच्छा से मानो छुआ हुआ, स्पृष्ट किरीट की किरणों से नख रूप रत्न दोनों पैरों में है ।। 8

लाख यज्ञ आदि की आग से उठे धुएँ के कारण सभी दिशाएँ पीली पड़ी हैं जो काल मेघों के समूहों से युक्त सी फैली हुई गर्वी शत्रु समूहों के संहार की चोट में सतत विशेष रूप से विस्तार किया ।। 9

भुजाओं रूप मन्दार पर्वत से लड़ाई रूप समुद्र को मथ करके बिखेर दिया गया यश रूप अमृत जो नहीं हरण करने योग्य है किसी शत्रु दल से । समन्तात् भाव से सब ओर से पीये जाने पर भी तीनों लोकों द्वारा जिसका जल किसी से भी नष्ट नहीं किया जा सका प्रत्युत् बढ़ता ही रहा विशेष रूप सर्वदा बढ़ा दिखा ।। 10

सूर्य किरण समूह के समान कठिनाई से देखे जाने योग्य अर्थात् चाकचिक्य युक्त, चमकते सोने के लाल कवच से चमकीला बना तथा अस्त्र के आघात से बने घावों से बहते रक्त से एवं बड़े-बड़े शत्रुओं के काटे गये शरीर से पड़े रक्त से सनकर जो प्रलयकालीन महाज्वाला की लपट की तरह लाल हो रहा था ।। 11

उसके पुण्यकृत्यरूपी महासमुद्र से निकला उसका यशचन्द्र, कलंकयुक्त अंगोंवाले प्रसिद्ध चन्द्रमा को मानो यह बताने के लिए कि तुम मेरे समान नहीं हो अधिक प्रकाशयुक्त और निष्कलंक कान्ति को फैलाया । कृष्ण-शुक्ल पक्ष के व्यवधान के बिना, बिना क्षय हुए, एक ही सर्वत्र उदित रहने में समर्थ यह यश चन्द्र तीनों लोकों को प्रकाशित करता रहा ।। 12

बहुत दिनों से उजाड़ पड़े महान् यशोधरपुरी को सोने की चमकवाले घरों, कंगूरों (विमानों) तथा बहुत से सोने-रत्नों से सम्पन्न कर धरती का इन्द्रलोक जिसने बनाया या कुश ने जैसे अयोध्या को पुनः सजाया था उसी प्रकार यशोधरपुरी को जिसने फिर से आबाद कराया ।। 13

महान् यशोधर तड़ाग नामक सरोवर के बीच में सुमेरु पर्वत के समान उच्च शिखरवाले पर्वत पर अपने बनाये राजमहल के रत्नजटित कक्ष में ब्रह्मा, विष्णु और महेश की मूर्तियाँ जिसने स्थापित कीं ।। 14

उसी का एक अत्यन्त स्वामीभक्त छोटा सेवक जो श्री कवीन्द्रारिमथन का उचित नाम पाया था ।। 15

सोने का झूला, मंजूषा, पीठ (आसन), मुकुट, कुण्डल आदि आभूषणों से वह राजा को भी चकित कर देनेवाला था ।। 16

जीतिमान अहंकार ही न वह शिल्प-दक्षता के कारण शिल्पियों में धन के कारण धनियों में तथा आत्मज्ञान के कारण ज्ञानियों में सबसे आगे था ।। 17

महान् कुल में उत्पन्न वह सत्त्व गुणानुराग के कारण सदैव जीवदया में परायण तथा अपने हृदय को धर्ममार्ग में नित्य अर्पित कर रखा था । वह गुणों और कलाओं का अक्षय निवास था ।। 18

उसी ने सुन्दर और बहुत बड़ी जिन भगवान् की मूर्ति, वज्रपाणि भगवान् की मूर्ति तथा दिव्य देवी की मूर्तियों को अपने हृदय के साथ ही अपने दिव्य राजभवनों में स्थापित किया । देवताओं में अग्रपूजित भगवान् बुद्ध की मूर्ति शक संवत् 875 में स्थापित की ।। 19

इस जयन्त देश (जीते गये देश) में जैन भगवान् की एक मूर्ति उसी ने शकाब्द 868 में स्थापित की थी साथ ही कुटीश्वर में उसी ने लोकनाथ भगवान् तथा दोनों दिव्य देवी मूर्तियों की स्थापना शक संवत् 872 में की थी ।। 20

श्रीमान् महेन्द्र पर्वत की चोटी के तीर्थसमूह में जो स्वच्छ है चारों ओर खाई है उसके जल में जो मंगल योग्य है छोटी रहने पर भी बहुत फल देनेवाली है, वे यहाँ सभी नहीं स्नान करें । बिना हवन करनेवाले श्रेष्ठ ब्राह्मणों के दूसरे भी स्नान करने की इच्छा न करें ।। 21

दो सौ से युक्त चार सौ दूरीवाले अग्रभाग हैं जिसके इतने विस्तारित प्रहर में भी प्राणियों के हित के लिए जो जल है उसमें तीर तोड़नेवाले हाथियों के झुण्डों को ही न यहाँ रखे निश्चित रूप से सर्वदा तड़ाग पर इससे किनारे टूट जाएँगे ।। 22

जो यज्ञ करनेवाले से दिया गया है उसने अपने पुण्य के विषय में दाता है सो इस स्थान पर देव के विषय में दिया गया है इसका हरण नहीं करना चाहिए । जो द्रव्य धनसहित चाँदी दासों से आढ्य, दासों से युक्त है इसका हरण वे न करें जो इस लोक का और पारलौकिक (परलोक का) सुख चाहते हों ।। 23

इस वाणी को बोलनेवाला जो वाणी सत्य और धर्म के अनुवर्तक है सभी

लोगों से जो धर्म और अच्छी वृत्ति के भागी हैं यदि अपने पुण्य की अपनी आत्मा से रक्षा करनी है तो भी दूसरे के पुण्य को कोशिश करके पालें– रखें ।। 24

II

बुद्ध भगवान् तुम्हारे बोध का विधान करें तुम्हें बोध दें जिससे निरात्मता का दर्शन हो । विरुद्ध का भी अच्छी तरह अच्छे के द्वारा कहा हुआ साधन परमात्मा का है ।। 25

श्री वज्रपाणि तुम्हारी रक्षा करें जो श्रीमान् बाहु को धारण करता है । तीनों लोकों की लक्ष्मी और शोभा का जो पालन करनेवाला है श्री वज्र को इन्द्र के वज्र के समान ।। 26

प्रज्ञापारमिता तुम्हें श्रेष्ठ पापों से बचावें । बुद्ध के सर्वज्ञ भाव रूप चन्द्रमा की पूर्ण करनेवाली पूर्णिमा की भाँति ।। 27

'राजेन्द्रवर्मन'– इस नाम से ख्यात् राजेन्द्र रजनी का स्वामी । श्रीमान् 869 से विभूषित शोभित आत्मीय मण्डल वाला ।। 28

बचपन में जिसने कामदेव को जीता जो कामदेव सुन्दरतारूपी सम्पत्ति से गर्वित है– जवानी में तो जीतने की इच्छा करनेवाले को जिसने फिर बुद्धि से जीत लिया ।। 29

विद्यारूपी पूर्णिमा की रात्रि में अनुरक्त जिस राजा के सभी कलाओं ने सेवित किया था जो कम्बुज की भूमि के राजवंश रूप आकाश का चन्द्र है उसकी सेवा की थी ।। 30

विशेष रूप से बिखरनेवाले षड्गुणरूप रसों से कीर्ति रूप चन्द्र की जय से अमृत से जो शुभ आरम्भों से शोभित है जल से समुद्र शोभित है ।। 31

जय की सुधा के रस से भीगे अंगोंवाला। यशरूप कौस्तुभ मणि से प्रकाशित प्रत्यक्ष कमलनयन जिसकी सेवा सर्वदा लक्ष्मी करती हैं ।। 32

रजोगुण से जँभाई लेता हुआ भी घने अन्धकार दिखाने पर जिसकी यात्रा में विशेष रूप से सत्त्वगुण न बढ़ा मानो प्रकृति के समान ।। 33

जिसके मुख चन्द्रमण्डल में ब्रह्मा ने ऐसा विधान किया ऐसी शंका

लेखक को है कि प्रत्यक्ष बिना भ्रम के दो चन्द्रों के दर्शन हुए ।। 34

राजाओं में सिंह के समान भी वैरीन्द्र रूप करीन्द्र भी सिंहावलोकन न्याय को लड़ाई रूप पर्वत की चोटी पर जो न खाये ।। 35

दाएँ-बाएँ दोनों हाथ से छोड़े अर्ब बाण उसने ऐसे अर्जुन को शीघ्र शत्रु के बल को देखकर जिसको कौरव से विवर्द्धित जाना गया था ।। 36

लड़ाई में सिरकटे शत्रु भी जिसके शत्रु समूह के आगे से किसी के द्वारा मण्डल से मुक्त होकर छूटकर सूर्य के मण्डल का अनुगामी बनाया गया ।। 37

जिसकी कीर्ति दिशाओं के अन्त तक जानेवाली है जिसकी कीर्ति के गुण के उदय के गाये जा चुके हैं, दिशाओं के राजा की लक्ष्मीरूपी हरिणी को प्यार करती हुई सी लोभ से मानो दिशाओं के अन्त तक जाने का काम करती है कीर्ति ।। 38

शुद्ध शब्दों के प्रयोगों से भरे पूरे धनी जिस राष्ट्र में यह वाणी 'न' थी । उत्तम पुरुष की बात ही ऊँची है, मध्यम पुरुष भी 'देहि'-दो यह वाणी मध्यम श्रेणी के लोग बोलते हैं ।। 39

सभी भूमि को प्राप्त करनेवाले जिस राजा के केवल चरण की धूलिमयी भूमि के धारण करने राजा होने भूभृत् भाव की प्राप्ति के लिए सभी राजा मस्तकों से चरणरज को धारण करते हैं ।। 40

तीनों लोकों को अपनी कीर्ति की गली के समान बनाने की इच्छावाले राजा मानो अपनी बाँहों के वीर्यबल से अर्व राजाओं का मर्दन-नाश कर डाला था ।। 41

वेदों और शास्त्रों के श्रवण से उसी से मिठासवाला; धर्म के अनुशासन में अग्रगण्य राजा जो अभ्युदयकारी निदेश देता है उसके आदेश के लिए प्रजाजन मनु की आज्ञा के समान याचना करनेवाले हैं । जैसे मनु की आज्ञा सबके सिर-आँखों पर रहती है, वैसे ही अपनी पढ़ाई से मधुर व्यवहार करनेवाले धर्मपालन से अग्रगण्य, ऐसे राजा के अभ्युदयकारी आदेश की याचना प्रजाजन मनु के आदेश के समान करते हैं अर्थात् पालते हैं ।। 42

खण्ड चन्द्र धारण करनेवाले शिव के आधे चन्द्र से प्रकाशित ऐश्वर्य आठ प्रकार के विभक्त हैं और राजा की कीर्ति अभिन्न है पूर्ण है– अखण्ड कीर्ति रूप चन्द्र से प्रकाशित होने से राजा का ऐश्वर्य अखण्ड है– पूर्ण है ।। 43

यशोधर तड़ाग के बीच में शिवलिंग की स्थापना की गयी साथ ही विष्णु, गौरी, शंकर, ब्रह्मा– इन देवों की मूर्तियाँ भी स्थापित की गयीं ।। 44

चम्पा आदि पर राष्ट्रों की जली आकृति कालाग्नि के समान है जिस राजा के तेजों का विस्तार दिशाओं के मुख में पुनः-पुनः अतिशय रूप से प्रकाशमान है ।। 45

जिसकी कीर्तिरूपी मणि दीपिका त्रैलोक्यरूप मन्दिर हिमालय की चोटी रूप उज्ज्वल शय्या पर लक्ष्मी की रति क्रीड़ा का विस्तार करती है- बिखेरती है ।। 46

जिसके द्वारा उत्तरायण के आधे समय में भी यज्ञ में दिये जल इन्द्र के द्वारा यज्ञ करनेवालों के समान दक्षिणायण में दक्षिणा हुई ।। 47

पाणिनि व्याकरण के नियमानुसार मानो प्रत्यय=विश्वास, प्रत्यय-जो किसी प्रकृति में अन्त में लगता है । प्रकृति=जिसमें प्रत्यय लगता है । प्रत्यय सहित प्रकृतियाँ योग्य हैं अपने अर्थ और दूसरे के अर्थ के प्रकाशन में जिसके वचन द्वारा पाणिनि के समान किया जाता है ।। 48

योगनिद्रा के संक्रान्त होने पर जैसे चिरकाल तक समुद्र में सोनेवाले विष्णु के हृदय पर सर्वदा जिस स्फटिक मन्दिर में लक्ष्मी सोती है ।। 49

उसका अनुचर सुन्दर पवित्र चरित्रवाला अच्छे आचरणवाला श्री कवीन्द्र, लड़ाई में शत्रु को मथ चुका है ।। 50

काञ्ची, करंक, कलश हैं प्रमुख जिनके ऐसे भोगों के विस्तारों से कम्बुजराज स्वामी के द्वारा सत्कार पानेवाला गुणगौरव से पूर्ण है ।। 51

जो राजकार्य में नियोजित होकर स्वयं राजा से सिर पर हाथ रखकर वरदान पानेवाला है उसने शत्रु के नाश आदि में सफलता पायी ।। 52

जो बुद्ध के स्वार्थ और विज्ञानपूर्वक विरुद्ध वचन वाक्य को अनुशासन

मानकर अपने आत्मीयों को दूसरे तीरन्दाजों को भी प्रदान करता था। (इस पद्य की दूसरी पंक्ति अभिलेख में अस्पष्ट है । बरहट्ट प्रविसंवादि के लिए अविसंवादि पढ़ते हैं । साथ ही येनानुराशीष्टं की व्याख्या करते समय अनुराशि के लिए 'अनुनिष्ठायम्' शब्द का प्रयोग करते हैं ।)।। 53

बुद्धि के सुन्दर स्वभाव से तादात्म्य लक्षण को बाँध करके जिसने समझा है कि एक व्यक्ति की आत्मा से सभी की आत्मा में एकता है । इस तादात्म्य से अपने मन का सम्बन्ध स्थापित करके योगी के ज्ञान को जिसने पाया है ।। 54

विजयी ने जयन्त देश में एक 'जिन' को स्थापित किया दो देवियों से युक्त और बुद्ध को भी कुटीश्वर में स्थापित किया ।। 55

धर्ममार्ग के प्रमाण से मानियों के अग्रेसर ने देवी, बुद्ध और श्री वज्रपाणि सबकी स्थापना की ।। 56

राजभवन, राजसदन, देवसदन जिसने प्रासाद भवनों को अपने हृदय-कमल से उसने पालन के लिए स्थापित देवलोक में इन कृत्यों और अन्य कार्यों को भी किया ।। 57

यहाँ यह अनुकरण करने योग्य है उस मनस्वी के द्वारा देवमन्दिरों में राजा के विज्ञापन और शासन को माना जाये ।। 58

सज्जनों के द्वारा धन नहीं चुराया जाये । हरनेवाले राजा से दण्डित हों ।। 59

इसमें एक वृक्ष भी जो पैदा हुआ है वह काटने योग्य नहीं है जो छाया देनेवाला है । ये तो जंगली वृक्ष हुए । जो घरैये वृक्ष लगाये गये हैं– सुख देनेवाले हैं– सुख चाहनेवालों के द्वारा उन्हें क्यों काटा जाये ? उनकी रक्षा की जाये ।। 60

शील के रक्षण में रत रहनेवाले दूसरों के लिए स्थिर बुद्धिवाले यहाँ बसें । वैसे शान्त भिक्षु लोग इसमें समाधि से रहें ।। 61

बड़े विधिपूर्वक रखे कल्याणकारी जलवाले तड़ागों में वेद जाननेवाले ब्राह्मण स्नान करें अन्य लोग कोई भी यहाँ न स्नान करें ।। 62

इस तड़ाग में वृक्षों की शीतल छाया में हाथियों का स्नान न हो यदि हो

तो दयालु लोगों द्वारा रोका जाये ।। 63

ये राजा के सभी वचन उसके द्वारा सिरआँखों पर रखे गये जो हितकर वचन हैं सज्जनों के । सुन्दर विशिष्ट रचना से युक्त अक्षरों से यहाँ इन श्लोकों से विशेष रूप से लिखे गये हैं– इनका पालन हो उल्लंघन न किये जायें ।। 64

III

समाधि रूप लकड़ी से बढ़े वैराग्य की चोट से मारे हुए शत्रु के वीर्य बलवाले बुद्ध जिसने अविनाशी राज्य की लक्ष्मी और बोधि को पाकर श्रेष्ठ मन्दिर में अधिराज होकर रमण करता है ।। 65

महानों की विभूति की रक्षा श्री वज्रपाणि इन्द्र करें जो शत्रु के मद के नाश में रुकनेवाले अग्रभागवाला वज्र है वैसे वज्र को हाथ में रखनेवाला मानो हज़ार आँखों वाले इन्द्र को हँसता है ।। 66

प्रज्ञापारमिता भुवनरूप कमल के उदय से शोभा और लक्ष्मी बढ़ानेवाला, प्रलय काल में कल्प के आकारवाले बड़े अन्धकार को मथनेवाली भूतों के अर्थ को सम्यक् बोध करानेवाली जो मण्डल की लीला को भी धारण करनेवाली निर्वाणरूप गली के शब्द में भ्रमरहित है वह रुचि कान्ति को विस्तार करती है– खुली हुई को दिन-रात प्रकाश देनेवाली है ।। 67

छः रसों के ऐश्वर्यवाली धर्म से भरी-पूरी पृथिवी को धारण करता हुआ श्रीमान् राजेन्द्रवर्मन राजा पृथु के समान विक्रमवाला नृपति है ।। 68

कामदेव के जल जाने पर शोक रूप अग्नि की शान्ति के समान निरास्थान, अपनी देह की कान्तिवाला डूबा है ।। 69

त्रैलोक्य की लक्ष्मी को देखकर ईर्ष्या सहित जिसके अंगों की साथिन कीर्ति-रूप स्त्री दस दिशाओं में द्रुत गति से चलनेवाली इन्द्रादि देवों को बोध कराती सी मालूम पड़ती है ।। 70

चन्द्रमण्डल को सन्ताप देने के चतुर जिसके तेज से सन्तापित सा आज भी सूर्य अपनी किरणों से जल को पीता है ।। 71

चतुर प्रताप से तप्तों को जो कमल पर चढ़ा हुआ प्रजापति कीर्ति रूप

दूध के समुद्र में विनीत राजहंसों को डुबा सका ।। 72

लक्ष्मी के स्वामी विष्णु के विक्रम से आक्रान्त भुवन में सभी देव लोग प्रसन्न होकर बली से जहाँ दुर्बल से बली प्रसन्न होता है ऐसे ज्ञात हुए ।। 73

श्रीराजा रूप सिंह की पटरानी से सेवित शून्य भी शत्रु की पुरी राज्य की लीला की नाईं भय से जिस कारण वन में छिप गयी ।। 74

जिस चमकते हुए तेज से भुवन की छवि को किसी कर्ता के द्वारा भी चढ़ाई में सभी दिशाएँ बल रूप धूल से अन्धकार युक्त हुईं ।। 75

रत्न सिंहासन पहाड़ पर राजा रूप सिंह के चढ़ने पर वीर्य बल से डरकर राजा रूप हाथी लोग प्रणाम करने लगे ।। 76

निद्रा से प्रेम करनेवाले श्रीकृष्ण को देखकर बड़ी प्रेयसी निद्रा से जलती हुई सी लक्ष्मी नित्य बोध से युक्त उज्ज्वल अंगोंवाले युवक पर जहाँ अनुराग करनेवाली हुई ।। 77

बाणासुर रूप शत्रु के विजय से जो लक्ष्मी उससे प्रदीप्त उद्दण्ड बली अनिरुद्ध (श्रीकृष्ण का पौत्र) था उसको दिशाओं का राजा जैसे विष्णु की स्तुति करता है उसी प्रकार युद्ध में विजयी की स्तुति सभी राजा करने लगे ।। 78

भुवन के उदय से सम्यक् बढ़नेवाली साम, दाम, दण्ड, विभेद की विधि से सोहनेवाली दिशाओं के राजा के सिर आँखों पर रहनेवाली जिसकी आज्ञा इन्द्र गुरु के समान माननीय हुई । जैसे इन्द्र गुरु बृहस्पति की आज्ञा देवराज भी मानते हैं ।। 79

जिसके चक्र, गदा, शंखधारी विष्णु नजदीक हैं या अच्छी निधि हैं । युद्ध में शत्रु की लक्ष्मी के केश पकड़नेवाले विष्णु के समान दोनों बाहुदण्ड शोभते थे ।। 80

जो अंगों की सुन्दरता रूप दूध के समुद्र में धोया पूर्ण चन्द्रमण्डलवाले... ...पंक से हन........लक्ष्मी से प्रकाशमान मुख को धारण किया था........।। 81

राजा लोग.........जीते............राज को विभीषण के विषय में ।....... जिसने दिया दूसरे राम के समान ।। 82

यज्ञ की आग...........महामहिष मण्डल में........जिसके ...........फैलने पर..........कल और सबेरा कहीं भी विशेष शीघ्रगामी हैं ।। 83

जिसने एक विक्रम=पराक्रम से समस्त भुवन को आक्रमण करके मानो परिश्रम से पैरों की समीपता राजाओं के मस्तक पर विधान किया गया ।। 84

.....चरणकमल को...........मण्डल की लक्ष्मी का........... ।। 85

...........दिलीप के समान.........जीते हुए से....................... ।। 86

................निश्चित ।............मेरु.............जिससे सींचता है ।। 87

राजारूपी चन्द्र...........(यशोधर)पुररूप कमल को । लक्ष्मी से शोभाओं से........छः के उदय फिर ।। 88

यशोधर तड़ाग के बीच में लक्ष्मी और शोभा से प्रकाशमान राजा के । मेरु पर्वत जो सुवर्ण का पर्वत जो स्वर्ग में है.........उसके समान...........सम्यक् भली–भाँति स्थापना की थी ।। 89

लक्ष्मी समुद्र चि.........उपशम=शान्ति से जैसे । आश्रित हुआ........ श्वेतसमूह को ।। 90

धर्म से आश्रित के समान जिसमें अधर्म से विरोध करनेवाले कल्याण और अभ्युदय– दोनों की सिद्धि लोग पाने लगे ।। 91

युद्ध में दोनों से दोनों के योग में दो प्रिय शीघ्रगामी दो हुए। लक्ष्मी से जिसकी कीर्ति शत्रु की बहुओं को वन में शत्रुओं को स्वर्ग भेज दिया ।। 92

हिरण्यकशिपु की लक्ष्मी से विरहित संसार को कर दिया जो नरसिंह भगवान् सज्जनों के विशाल विचित्र चरित्र करने लगे थे ।। 93

जैसे देवों ने समुद्र को मथकर एक स्वार्थ से विष्णु ने लक्ष्मी का हरण किया था, वैसे ही युद्धरूप समुद्र मित्रों के लिए भी समस्त संसार को एक राजा ने हर लिया था ।। 94

प्रचण्ड बलवाले उसके गुप्तचर भक्ति से पैरों में बँधने से शोभित थे । श्री कवीन्द्र रूप शत्रु के मथनेवाले लक्ष्मी से लाल सदृश कमल पर सोहते थे ।। 95

चार चतुर उपायों से यश पैदा करनेवाली विशिष्ट विवेचना करनेवाली धर्म से युक्त अर्थ धन की सिद्धि करनेवाली जो बुद्धि नीति के समान सोहती थी ।। 96

बौद्ध धर्मावलम्बी होकर भी जो बौद्ध धर्म में एक तान से रमनेवाला किसी के द्वारा इस राजा में भक्ति बँधी थी जो राजा परमेश्वर के समान था ।। 97

यशोधरपुर में रमणीय मन्दिर देवों का प्रिय था । शिल्प को जाननेवाला विश्वकर्मा के समान जो इस राजा से बनाया गया था ।। 98

सभी लोगों की प्रेरणा में जो शैल आदि की कृति में कुशल हैं । यशोधर तड़ाग के बीच में राजा से नियोजित था ।। 99

संसाररूप समुद्र से छुड़ानेवाला, प्रेमियों को निर्वाण का सुख देनेवाला यश उज्ज्वल जिससे सभी दिशाओं के मुख उज्ज्वल दीखें । सुखपूर्वक जाने योग्य बन्धु के दोनों लोकों में सुन्दर गमन योग्य, बुद्धि की पारंगतता यहाँ उससे विधान होता है इन स्थापनाओं से अतएव स्थापना की गयी । सज्जनों के समीप फल सुन्दर बिखेरे गये हैं ।। 100

नित्य बँधे निवास से वैराग्य से प्रासाद मण्डल को उस योगी ने हृदयकमल की भाँति बनाया था ।। 101

स्वच्छ पवित्र जल से इस तड़ाग को जैसे ज्ञान से निर्वाण प्राप्ति होती है, वैसे ही इसका निर्माण किया था ।। 102

सभी प्राणियों के आनन्द के लिए महानों का तड़ाग कहा गया, माना गया है । उसने वह जैसा आचरण किया उससे बौद्ध धर्म की वृद्धि होनेवाली है ।। 103

राजहंस के स्नान योग्य पुण्य देनेवाले पोखर में राजपुरोहित ब्राह्मण ही स्नान करें– यह उस राजा की मति है ।। 104

उस तड़ाग के वन से हाथी जो तड़ाग के तट को तोड़नेवाले हैं सज्जनरूप सिंहों के द्वारा रोके जायें, जिनकी गर्दन पर धर्मरूप के सिंह की गर्दन के ऊपर के केश सोहते हैं चमकते रहते हैं ।। 105

सर्वदा विनाश से आनेवाला अन्धकार.........चार देनेवाले........बचे लोगों को.........पुण्यरूप कमल के खिलानेवाले सूर्य के समान.........जन को निश्चित.........भावी ।। 106

शिवाच्युत नामवाले के द्वारा...........प्रासाद में.........देवसदन में या राजसदन में............कमल बन्धन...........।। 107



# 68

# प्रे रूप अभिलेख

## Pre Rup Inscription

अंगकोर क्षेत्र में प्रे रूप का मन्दिर है । मन्दिर के खड़े पत्थर पर दोनों ओर अभिलेख उत्कीर्ण कराये गये हैं । शिव, त्रिमूर्ति में अनुभूत ब्राह्मण, वासुदेव तथा नारायण की प्रशंसा से इस अभिलेख का प्रारम्भ होता है । राजकीय वंशावली की भी चर्चा इसमें है । ऐतिहासिक रूप से इसका ज्यादा महत्त्व है क्योंकि यह अन्तिम रूप से हर्षवर्मन द्वितीय तथा राजेन्द्रवर्मन के सम्बन्ध में कुछ विवाद के पश्चात् राजेन्द्रवर्मन की राजगद्दी, उसकी यशोधरपुर में वापसी, राजधानी की पुनर्स्थापना तथा चम्पा पर विजय इत्यादि प्रश्नों का समाधान कर देता है ।

इस अभिलेख का उत्कीर्णक संस्कृत का पण्डित अवश्य रहा होगा । 'मनोहर' नाम के एक नये काव्य की चर्चा है । योगाचार प्रणाली का भी वर्णन है । महाकाव्य और पौराणिक कथाओं, अथर्ववेद, रामायण, महाभारत, अष्टाध्यायी एवं रघुवंश से भिन्न-भिन्न रूप से उदाहरण प्रस्तुत किये गये हैं । राजा की धार्मिक

स्थापनाओं में मेबन के मन्दिर एवं यशोधर तटाक की खुदाई के अतिरिक्त भद्रेश्वर, चौपेश्वर और गंगा को दिये गये उनके दानों का भी वर्णन इस लेख में है । राजा के द्वारा प्रे रूप का मन्दिर बनाया गया और इसे लिंग राजेन्द्र भद्रेश्वर को समर्पित कर दिया गया । शिव की (राजेन्द्रवर्मेश्वर राजेन्द्र विश्वरूप नामक दो) उमा और विष्णु की मूर्तियाँ इस चौकोन के चारों कोने पर पाये गये छोटे-छोटे मन्दिरों में स्थापित की गयी हैं । प्रधान मन्दिर केन्द्रीय स्थान पर है । छोटे-छोटे उपमन्दिर भी जोड़ दिये गये हैं जिनमें शिव के आठ रूपों की मूर्तियाँ हैं ।

इस अभिलेख में 298 पद्य हैं। कम्बोडिया से प्राप्त अबतक के सभी अभिलेखों में यह विशालतम अभिलेख है ।

इस अभिलेख का सम्पादन जॉर्ज सेदेस ने किया है ।[1]

**ऋग्भिर्व्वह्निशिखाकलापविसख्य क्ताभिरैन्द्रीन्दिशं**
**प्रोधद्वायुसमीरितेन यजुषा यो दीपयन्द क्षिणाम् ।**
**साम्ना चन्द्रमरीचिरश्मिनिकर प्रद्योतितेनापरा-**
**ङ्कौवेरीञ्च विभाति तैस् समुदितैस्तस्मै नमश् शम्भवे ॥ 1**
**ओङ्कारादतनुस्तनोति जगतामेकोऽपि जन्मोस्थिति-**
**ध्वस्तिर्व्यक्तसमस्तशक्ति निलयो यो योगियोगात्मकः ।**
**भूयो नीरजजन्मकञ्जननयन श्रीकण्ठमूर्त्तिर्व्वशी**
**शब्दान्तस्थितये शिवाय विभवे शान्ताय तस्मै नमः ॥ 2**
**ब्राह्मीमिन्दौ सवित्रीं सवितरि विततां वैष्णवीं पालनीं यद्**
**शैद्री संहार हेतुं हुतभुजि च कलामर्प्ययत् त्रिप्रकाराम् ।**
**दृष्टन्दृक्शक्तिदृग्भिस्तिषु रचितवपुस् सूक्ष्ममप्येषु तस्मै**
**तत्त्वज्ञानां परस्मै परिदृतरजसे ब्रह्मणे स्तान् नमो वः ॥ 3**
**पारे सत्त्वरजस्तमस्कमपि यो नित्यन्निविष्टः पदे**
**त्रेगुण्येन चतुर्व्विधेन विविधाभिव्यक्तिराविर्भवन् ।**
**विश्वाकारधरो निरस्तसकलाकारोऽपि देदीप्यते**
**वन्दन्तां भगवन्तमादिपुरुषन्तं वासुदेवं विभुम् ॥ 4**

1. *IC*, p.73

षड्गर्भ प्रभवाय बुद्धिजननीं विद्यो विनिर्म्माय या
गर्भे सप्तमगर्भकर्षणकरी हंसस्य सूतेऽष्टमे ।
मूर्त्ता कंसवधोद्धुरं विदधती नादन् नमस्योद्धगा
साद्या शक्तिरकृत्रिमा भगवतो नारायनी नम्यताम् ।। 5
आसीदासिन्धुसीमस्फुरितसितयशोराशिसञ्चारराजद्
राज्यश्रीमण्डितनिन्दितपुर विकसन्मातृवंशाधिपत्यः ।
सोमाकौण्डिन्यवंश्यो दधदनतनृपाद्वादशादित्य दीप्तिश्
श्रीबालादित्यभूपो वलयमिव भुवो मण्डलं लीलयायः ।। 6
यां विश्वरूपभट्टो यो लेभे ददागिनीसुताम् ।
पत्नीं सरस्वतीं विप्रो वासिष्ठोऽरुन्धतीसिव ।। 7
ब्रह्मक्षत्रिययोर्व्वंशे पारंपर्य्योदिते तयोः ।
जाया द्विवेदभट्टस्य ज्ञाता वेदवतीति या ।। 8
यस्याः पुण्यगुणस्य मातृजननीभ्रातुस्तनूजो जिता-
रातेश् श्रीनृपतीन्द्रवर्म्मन्तपतेश् शौर्य्येण शौरेरिव ।
शृङ्गे श्रीजयवर्म्मणः कृतवतो माहेन्द्रशैले पुरीं
मातुम्मतिलमातुलो तुलकलश श्रीपुष्कराक्षोनृपः ।। 9
स्वर्ग्गद्वारे पुरे या पुरि पुरि च पुरा स्थापितं भूमिभर्त्रा
श्रीबालादित्यनाम्ना निजकुलतिलकेनैश्वरं लिङ्गमिद्धम् ।
भर्त्रा तेनैव वेदद्वितयमदृशा पूजयित्वा समस्तै-
र्भोगैस् स्वर्गप्रतिष्ठामलमत विलसत्कीर्त्तिसन्दीपितश ।। 10
या तत् कुलीनावनिपालवंश-
परंपरायामुदिता महत्याम् ।
महेन्द्रदेवीति महीव गुर्व्वी
देवीसुरस्त्रीव दिवोऽवतीर्ण्णा ।। 11
महीपतेर्व्वेदवती पितुर्य्यः
कलां कुलीनस् सकलान्दधानः ।
राजन्यवंशाब्धिनिशाकरश श्री-
महेन्द्रवर्म्मा महनीय कीर्त्तिः ।। 12
तेनोर्व्वीभृद्वराङ्गे विदलिततमसा पादविन्यासलीला-

मातन्वानेन तस्यान्नरपतिवनिता मूर्द्धधूताङ्घ्रि धूल्याम् ।
देव्यां वैवस्वताख्यो मनुरिव रविणा राजधर्म्मानुरक्तो
यश् श्रीराजेन्द्रवर्म्मेत्यजनि दुहितरि त्वष्टुरुर्व्वीपतीन्द्रः ॥ 13
प्राग्वेदाभ्यसनद्विजेन जनितं श्रीविश्वरूपेण यत्
तप्तं यत् त्रिविधन्तपस् सह तया पतन्या द्विवेदेनयत्
भुमृद्भिश्च तदन्वये समुदितैर्य्यत्तेन तेनांशुमद्-
वंश्यानां दूरिरादिदेव इव यो वंशे तदीयेऽभवत् ॥ 14
सञ्जातो विजयी निजेन जयिना तेजः प्रकर्षेण यो
नीचीभावितवानशेषमपि सन्तेजस्विवृन्दारकम् ।
केनापि प्रतिपादिताखिलमही साम्राज्यसंपद्गुणान्
अर्क्कादीन सादिष्ट भूरिमहसामुच्चाश्रयानाश्रयान् ॥ 15
मातुः क्षत्रियवंशदुग्धजलधेर्ल्लब्धोदयायाश् श्रियश्
श्रीभर्त्तुः पुरुषोत्तमस्य च पितुभस्वित्कुले भास्वतः ।
कान्त्या काम इवाधिकोऽपि निरवद्याङ्गो निरुद्धस् सुतो
यो गर्भेश्वरशब्दमर्थ्यमभृतानीतं गुणैरैश्वरैः ॥ 16
सोमाख्यात् सर्ग्गसाराद् भवपुररुचिराल्लिङ्गमाह्लादनत्वं
बालादित्यात् प्रभुत्वन्त्रिभुवनकमलोन्मीलनायाददानः ।
वह्नेर्द्दीप्तिं पितुस् स्वान्महति भवपुरे पीश्वरादीश्वरत्व-
देवीयुक्तात् कुमारो दिशिदिशिविदतस्सर्व्वतेजोमयो यः ॥ 17
दुर्गाभियोगाद्विफली कृतारि-
काक्षं यशोदाभ्युदयाय दक्षम् ।
महेन्द्रतो लब्धमहाभिषेकं
रराज शौरिरिव यस्य बाल्यम् ॥ 18
सत्वं गुणं कर्म्मदधानभिद्धं
सामान्यमन्येषु विशेषमिच्छन् ।
व्यधत्तधाता समवायवृत्त्या
यस्याखिलं लक्षणमग्रयमङ्गे ॥ 19
कामस् स्वकान्तिदिनकृत किरणैविकीर्ण्णैः
पीतान्यकान्तिजयशोलवपल्लवलाम्भाः ।

यत्कान्तिसागरमपारमुपेत्य मग्नो
मन्ये करोति मकरन्निजवाहनं यत् ॥ 20
व्याख्यामयीमुपगम्य हतान्धकारां
राकामिनः पटिमदीप्तयनुसं वशात् ।
विद्येन्दुमण्डल मुदीर्ण्णरिसामृतार्द्रं
सर्व्वानिपाययत यो विबुधान्‌सज्ञः ॥ 21
यस्यास्रशिक्षाञ्चरतः प्रशंसा
लोकेऽकरोत्कर्ण्णमनः प्रसादम् ।
कर्ण्णप्रणीता महती तु निन्दा-,
नु श्रूयतेऽद्यापि धनञ्जयस्य ॥ 22
दण्डन्त्रिखण्डं पृथुलं सलीलं
लुलाव लोहं कदलीदलाभम् ।
सकृत्कृपाणं लघुपातयन् यः
किमुच्यते मांससमयेऽरिदेह ॥ 23
नीलोत्पलस्यापि दलेऽयसीव
नासिश्छिदाशक्तिमगात् परेषाम् ।
यस्यैव मन्त्रौषधिवीर्य्य योगाद्
वज्रोपमायां किमुतांसयष्टौ ॥ 24
धनुर्धनुर्व्वेदबिदां वरोऽपि
विधूय मौर्व्वीरवपूरिताशः ।
प्रयोगतोऽभिस्खलितं विपश्चिद्
यश्चापशब्दन्न चकार काञ्चित् ॥ 25
यस्याकलङ्कास् सकलाः कलाली-
रत्नङ्करिष्णोः किल बालभावे ।
चन्द्रस्तुलार्थीव तुलामलब्धवा-
धुनापि वृद्धौ पुनरेति बाल्यम् ॥ 26
मूर्द्धाभिषिक्तस् सुकुमारभावो
दृप्तद्विषत्तारकदारिशक्तिः ।
निनाय कीर्ण्णान्दिशि कम्बुसेनां

यो देवसेनाभिव कार्त्तिकेयः ॥ 27
सदानवारीकृत दिक्प्रयातो
नागेन्द्रभीमो भगवानिवेशः ।
ब्राह्मैर्व्विधानैः परिरक्षितो यो
भस्मीचकारारिपुराणि रोषात् ॥ 28
शरान्तरीकृत्य शरीरयष्टी-
रुत्कृत्य कृत्स्नानि शिरास्यरीणाम् ।
खङ्गीगदामृत करीकुम्भपेषी
प्रादुश्चकारास्रममानुषं यः ॥ 29
जित्वैकवीरो दिशमिन्द्रगुप्तां
यो दक्षिणान्देह भृतान्दिदीपे ।
प्रचितसीञ्चतेसि सोत्तराञ्च
न राजसूयाय तु जिष्णुरेकाम् ॥ 30
प्रत्यन्तपृथ्वीं सकलां विजित्य
बालोऽपि यूनो नृपतीन् प्रताप्य ।
प्रतीतया कम्बुपुरीं यशस्वी
संयोजयामास जयश्रिया यः ॥ 31
रणार्ण्णवाधस्य जयामृतेन
जातं यशः कोस्तुभरत्नमार्द्रम् ।
त्रैलोक्यमाह्लादयति त्रिधैकं
मूर्त्तं मुरारेर्हृदयं मुदेव ॥ 32
कलाभिराह्लादयितुं समस्त-
लोकं विवृद्धाभिरनुक्रमेण ।
विमुक्तबाल्योऽपि शशीव साक्षात्
कलाक्षयं यो न बमार भूयः ॥ 33
अवस्थितिं शैशवजां विलुप्य
राजश्रिया सङ्गमकांक्षयेव ।
स्थेयोऽन्न तिष्ठेति कृताज्ञया यो
नीतो नवं यौवनमादरिण्या ॥ 34

या कान्तिरत्यन्यनरेन्द्रसर्ग-
शोभा शिशुत्वे ददृशे नु यस्य ।
तां यौवने कर्त्तुमनाः प्रकृष्टां
यत्नं विरिञ्चो नितराञ्चकार ।। 35
विलोक्य दिक्पालजये जयाख्य
ञ्जयश्रियालिङ्गितमीर्ष्ययेव ।
यमालिलिङ्गे गुरुवाङ्नियुक्ता
कुलोचिता कम्बुजराज्यलक्ष्मीः ।। 36
यामिर्य्यतो झटिति भूमिभृतोऽन्यराष्ट्रे
सस्रंसिरे समररङ्गगता गृहीताः ।
राज्यश्रियं षडरिमूर्त्तिभिरेव ताभि-
र्य्यस्तामधारयदतत्पुरुष प्रयोगात् ।। 37
यस्याङ्गलग्नं विहितेऽभिषेके
तीर्थाम्बु यावन्न जगाम शोषम् ।
तेजोजवलत्तावदशोषयत् द्विड्-
बधूजनानामधरे मधूनि ।। 38
जातं वराङ्गाभरणं भवस्य
नवेन्दु मुद्वीक्ष्य नवार्क्कबिम्बम् ।
चूड़ामणीभूय नु यस्य सेर्ष्यं
भासा शिरोऽरञ्जयदीश्वरस्य ।। 39
ध्रुवन्धराभारधरस्य यस्या-
हीन्द्रो मणीन् भोगसहस्रदीप्तान् ।
आहृत्य हर्षादिव बीतमारो
भूषासु हैमीषु बवन्ध सर्व्वान् ।। 40
स्रीणान्दिदृक्षाक्षुभिता यदीयं
ग्रस्यकृत्ते सवि कान्तिचन्द्रम् ।
निमेषचंद्र द्विषि चक्रियचक्र-
क्रुधेव रक्ता ददृशुर्दशोयोङ्शम् ।। 41
राज्यास्थितौ त्रिभुवनाभ्युदयाय यस्य

या काश्यपी रतिरभूददितिप्रभूता ।
मन्वन्तरे सुरपतेरिव गोप्तुरस्मिन्
पूर्व्वेन्द्रसंपदि न सा कृतसन्निधाना ॥ 42
सिंहासनस्थमवलोक्य महीभृतं यं
दृष्ट्वा मही सुमहती श्रियमानिनाय ।
सिंहासने स्थितवती स्वयमेव रामात्
सीतां श्रियन्तपजहार महीभृतोऽपि ॥ 43
विस्तीर्ण्णरत्नरुचिरञ्जित हेमदण्डं
यस्यैकमेव शुशुभे सितमातपत्रम् ।
मेरोरिवोपरिगतं सकलेन्दुबिम्बं
सद्भक्तिवारिषु तु तत्प्रतिबिम्बमन्यत् ॥ 44
निर्व्विक्रियायां प्रकृतौ कृताया-
मप्येष यस्याविरभूद्विकारः ।
हैमीव यद्रत्नमयीय चासी
द्रे मौलिरत्नैर्नतभूभूजां भूः ॥ 45
क्षोणीभृतान्दीप्तवती वराङ्गे
ष्वाह्लादनी वाग्दहनी च यस्य ।
तेजोमयी सूर्य्यशशाङ्कवह्नि-
सङ्घातुल्याकृतलोकयात्राम् ॥ 46
माद्यन्ति यैरन्यमहीभृतस्वैश्
शशाम यो राज्यसुखोपभोगः ।
प्रावृट् प्रवृद्धैजलिदाम्बुबर्षैः
सिन्धोर्व्विप्यर्यति पयो हि नाब्धेः ॥ 47
राजन्वीत्य नृपोऽन्वशात् प्राङ्
निपातनाल्लक्षण मन्तरेण ।
यो लक्षणैय् संस्कृतवर्णवर्द्धि-
पदैस्तु साधुत्वधरान्धरित्रीम् ॥ 48
कुलक्रमैस् स्वैरपिः राजविधान्
दीप्तामतीतैर्भुवि भाविभिश्च ।

योऽदीपयत् प्राप्य विशेषता स्यन्
तमांसि मध्याह्न हवार्क्कभासम् ॥ 49
न भूभृतोऽभूत परिणीय कन्याम्
एकान्नु नाके परमेश्वरः प्राक् ।
भूत्वा तु भूपो भूवि योऽधिक श्रीः
कन्याशतं भूरधिकेति नाकात् ॥ 50
भ्रान्तावरुग्नमृदुकार्म्मुकमेत्य रामं
राज्यदपेतमरिणापदृता पुरा श्रीः ।
यञ्जानकी किल दृढ़ाक्षतकार्म्मुकन्तु
राज्यस्थिर स्थितम् शवयत नापहर्त्तुम् ॥ 51
न्यक्कर्त्तुमिच्छन्निलिखिलानिवान्यान्
यूनो नवं यौवनमादधानः ।
दत्वा मदं यः प्रमदामनस्सु
शान्तिं स्वकीये मनसि व्वतारीत् ॥ 52
यथा यथाबर्द्धत यौवनश्रीः
कालेन्दुना यस्य विवृद्धिभाजा ।
समुद्रवेलेव तथा तथोच्चै-
रुद्धयोतिदृष्टङ्गुणरत्नमृद्धम् ॥ 53
महेन्द्रसंपत्परिबृहितश्री-
रापूर्य्यमाना विबुधैरनेकैः ।
धम्मर्या सुधर्म्मेव दिवोऽवतीर्ण्णा
बभौ सभा यस्य भुवि प्रगल्भा ॥ 54
धर्म्मानुकूलौ कविरर्थकामौ
धर्म्मञ्च कामार्थकृतार्थयोगम् ।
त्रिवर्ग्गमेकान्तभिवैक वर्ग्गं
यो सेवतोदार फलानुबन्धम् ॥ 55
त्रैकाल्यविज्ञानवतोऽपि यस्य
साक्षादिवेशस्य नरेन्द्रमूर्त्तेः ।
नेत्रीकृतस्तत्त्वविचारदक्षः

पूषेव दिक्षु प्रचचार चारः ।। 56
इतस्ततस् स्वाश्रयतस् समन्ता
दागुर्गणा यं स्वयमन्यदीयाः ।
गाम्भीर्य्य रत्नाकरमेक पात्रं
सत्वाभिपूर्ण्णत्रिखिला इवायः ।। 57
य श्चाप्त वाचोपमयानुमाना-
र्थापत्ति संविद्भिर भावयुग्मिः ।
कार्य्याव्यकार्षीत् सदसच्च सर्व्वं
षडभिः प्रमाणैरधिगम्य गम्यम् ।। 58
स्वच्छाम्बुवापी करीविलासा
विकासिपद्मोत्पलपुञ्जनेत्रा ।
मूर्त्तेव पूर्ण्णेन्दुमुखी दिशश् श्री-
र्य्यं सेवमाना शरदाससाद् ।। 59
धर्म्म्यान्दद्यानो विबुधार्थ सिद्धि-
न्द्विट् कामविध्धंसन विद्ययाढ्यः ।
रुद्राद्रिजासङ्गमवधदीयो-
द्वयोगो जजृम्भे विजयाभिजुष्टः ।। 60
पद्मोदये दत्तगुणोऽपि युक्त्या
पूषेव दोषावसरम्निरस्य ।
यतेन्द्रियाश्वस्य भुवो विभूत्यै
संमन्त्रणं मन्त्रिभिरग्रहीद्यः ।। 61
चत्वारोपि महागभीर गतयोऽप्या शास्वपि स्थास्नवो
भूभृद्भङ्ग कृतोऽपि वर्ढ्धिततमैस् स्वैर्व्वाहिनी विस्तरैः ।
श्रीजन्मावनयोऽपि कर्त्तुमपि गां रत्नैरलं पूरितान्
नोपायैर्जल शशयोऽति पटुभिर्य्य स्योपमेया जड़ा ।। 62
अम्मोधरध्वानगभीरया यद्-
वाण्या ककुभ्यस्त्वरितास् समन्तात् ।
समाययुर्नद्य इव ध्वजिन्यो
द्राक् प्रावृषा केदितयात्रयाप्तैः ।। 63

व्यतीतवत्यां शरदि क्रमेण
दिश्चक्रवालात तवाप्पलक्ष्या ।
हेमन्तलक्ष्मीरभिषेक्तुमाराद्
यं योग्यमाधर्व्वनिकीव सिद्धिः ॥ 64
सुवर्ण्णवर्ण्णस् सुखो वितीर्ण्णं
पुरोधसा हव्यमुपाददानः ।
प्रदक्षिणावर्त्त शिखश् शिखीच
दिदेश यस्मै जयशब्दमुच्चैः ॥ 65
आमृत्याधारया यश् श्रियमनुपगतक्षीणभावां विवृद्धां
प्रापत् कृत्स्नार्क्कविम्बादिव कलशशतात् कालधौतात् पतन्त्या
पुष्ये पुष्येऽभिषिक्तो विधुरुपगतवान् वृद्धिमेकार्क्क विम्बाद्
एव क्षीणस्त्वभाग्य प्रबिरहिमहो भत्य एवास्ति भाग्यम् ॥ 66
स्वभावतः प्रागपि कान्तिमग्र्यां
यस्य व्यतानीदपभूषमङ्गम् ।
संबद्धसर्व्वाभरणन्तु भूयः
कामप्यभिख्यायपुषत् प्रकामम् ॥ 67
सत्योपमा नूनमनान्तशक्ति-
र्य्यस्याङ्ग कान्तेर्भवितुं बभूव ।
मिथ्योपमादर्शतलं प्रविष्टा
कन्दर्प्पकान्तिः प्रतिविम्बलेशा ॥ 68
निश्शेषभूमण्डललङ्घनाय
यो विष्णुवद्धीक्षित विक्रमोऽपि ।
नाक्रान्तवानुल्लिखितं पृथिव्या-
माचारचारुः परिधं प्रायास्यन् ॥ 69
कक्ष्याभिरश्वैरिव सप्तभिर्य्यो
निर्य्याय यात्रानिलयोदयाद्रेः ।
भास्वान् नवीनोदितवान् वभासे
भीतिन्नयन् वैरितमांसि दिक्षु ॥ 70
द्विजाधिराजामल मण्डलेन

स्फुटामिराशीर्भिरुदीरिताभिः।
ज्योत्सनाभिरिद्धाभिरिवाभियाना-
रम्भे जजुम्भे कुमुदाकरो यः॥71
संघातमेकत्र दिदृक्षुणेव
पुञ्जीकृतैर्द्दैवबलेन सैन्यैः।
अनुप्रयातो गजवाजिवृन्द-
सान्द्रैः प्रतस्थेऽरिजिगीषया यः॥72
याने पृथोब्रह्मपदं श्रियेऽहन्
द्रुतेति भूर्य्यस्य मुदेव याने।
भूत्वा रजोऽसंख्य पदातिमर्द्दा-
च्छ्रीसंपदे विष्णु पदं प्रपेदे॥73
व्यूढ़ेपि तुल्यं परकीयसैन्ये
यस्यैव सेना ददृशे ससारा।
उपाधिनद्धे स्फटिकेपिगाढ़-
रागेऽस्ति दीप्तिर्न्न हि पाद्मरागी॥74
मन्द्रध्वनौ गर्ज्जति यस्य चापे
मुक्तेषुवृष्टावभवज्जिगीषोः।
आरादिवारादपि रत्नसूर्भू-
र्व्विदूरभूरेव तु मेधमारे॥75
क्षात्रीं भुजाज्जातिमजस्य जातां
यस्र साधयामास परैर्न्निषिद्धाम्।
दृष्टश्रुतानन्यज बाहुवीर्य्याद्
युद्धेऽन्यथैवानुपयद्यमानात्॥76
शौर्य्योन्नतिर्य्यस्य हताहितासृग्-
बाल प्रवालोद्ग मलाञ्छितानौ।
पुपोष पुष्टा कुसुमास्रशक्तिं
वसन्त संप्राप्तिरिवास्रशिक्षाम्॥77
सिन्दूरदिग्धादरिदन्ति कुम्भात्
सन्ध्यापिशङ्गाद्दिगणादिवाजौ

तेजस्विनो यस्य करासिभिन्नात्
पपात मुक्ताफलतार काली ।। 78
कीलाललाक्षारुविता विकीर्ण्ण-
वानावतंसा द्रुतभौक्तिकस्रक् ।
यं प्राप्तवत्याः प्रहरन्तुमाशु
रेने रणोर्व्वी पटधीव लक्ष्म्याः ।। 79
प्रोतां प्रवीरारिशरीरस्यष्टिम्
आन्दोलयित्वा दिशि नर्त्तयन्ती ।
शक्तिर्य्यादीया द्भूततारकाङ्गी
गौडीव दृष्टा न सुरैस् सरागम् ।। 80
भिन्नारिरक्तैररुणा विरेजे
भुजोज्ज्वला यस्य रणेऽसिधारा ।
कीर्त्तिः प्रकीर्ण्णेव शिखा समस्त-
द्वीपेकदीपीभवितुञ्जलन्त्याः ।। 81
गदाभिपिष्टारिकरीन्द्रदन्त-
क्षोदं बलक्षं क्षुभितं समीके ।
केशेषु लक्ष्म्यास सुरतक्षमाया
यः केटकीकेसरवद् वितेने ।। 82
तीव्रार्जुनास्रहत भीष्म विपक्ष युद्धो
योद्धा युधिष्ठिर इवार्क्कजदीप्तिरोधी ।
योऽजातशत्रुरिति भीमगदावरुग्न-
दुर्य्योधनोरुविनिपात रणावसानः ।। 83
प्रत्यस्तपाटपतले ररिसंप्रयुक्ता-
न्यास्त्रान्य मेघतनुरूप्यखिलानि रोद्धा ।
खड्गांस्तु सद्वयजनवद्भूभितान्मरुद्भि-
रुष्मच्छिदोऽसहत यो रणरङ्गतप्तः ।। 84
कृपाणपाणिः कृपणे कृपालुः
कृपां व्यद्याद्यो जितवैरिवीरः ।
गङ्गाम्बुलीने तु न धार्त्तराष्ट्रे

चक्रुः कृपां व्यूहमपास्य पार्थाः ॥ 85
गोमण्डलस्योपकृतिञ्चिकीर्षु-
रुन्मूलयन्मुभिभृतं भुजेन ।
गोवर्द्धनं कृष्ण इवास्पदेयो
भूयस् स्वकीये कृतवान कम्प्यम् ॥ 86
स्निग्धासिपातनकरेण यथावकाशं
येन स्थितां विदलितां स्वतनुं प्रपश्यन् ।
शङ्के निवर्त्तनभिया द्विषतोऽन्तरात्मा
प्रेतस्य संपरिवृतो भृशमप्सरोभिः ॥ 87
अहो युवैव स्वमुरः स्थिरोऽय-
मप्येकदादान्न पराङ्गनाम्यः ।
इतीव यस्य प्रतिकूलभावा
वक्षोऽरिलक्ष्मीर विशद्रणेषु ॥ 88
तीक्ष्णासिधारमपि यञ्जयिनञ्जयश्री-
रालिङ्गय वक्षसि बृहत्यकरोत्सरागम् ।
नैसर्ग्गिकं स्वसुभगत्वमुदाहरन्ती
गौरीव दग्धमकरध्वजदेहमीशम् ॥ 89
यमेकमौकस् सकलावनि श्रिया-
मलंकृताङ्गभवयौवनश्रिया ।
प्रपद्य पद्मा पुरुषे पुरातने
निनिन्द नूनंस्वरतिं पुरातनीम् ॥ 90
विसर्ज्जिता येन रणेपु जीव-
ग्राहं गृहीता बहवोऽरिवीराः ।
बज्री बलिं विष्णुबलेन बद्धा
धुनापि नोन्भुञ्चति भीरुवत्तु ॥ 91
नयन्नयेनैव पराक्रमं यः
पराक्रमेण प्रतिहत्य हन्ता ।
द्विषां प्रतीद्यातजड़स्तु सिंहो
दन्तीन्द्र दन्तद्वयनिर्द्दितांसः ॥ 92

द्विषो द्रुता यस्य हतावशेषा
स्त्यक्तायुधा युध्यपि राजसिंहाः ।
विदुद्रुवुर्व्वन्य करीन्द्रभीताः
पुनर्व्वने बालभृगायमाणाः ॥ 93
तेजोग्निदाहात् किल यस्यकेयि-
ञ्जले ममज्जुर्जलधेर्व्वि पक्षाः ।
के चित्वमुष्मादतिशीतलोऽयम्
इतीव तक्कदिविशन्दवग्निम् ॥ 94
शोकानलो नेत्रजलैरजस्र-
ञ्जज्ववाल यद्वैरिविलासिनीनाम् ।
वैधव्यसन्तापितमानसाना-
माविन्धनं वह्निभिवानु कुर्व्वन् ॥ 95
हसास् सितच्छत्ररुचो वनेभाः
पर्य्यन्तपाला धृतराजशब्दाः ।
सिंहाः पुरीं यद्वचनादरीणां
सराजलीलामिव रञ्जयन्ति ॥ 96
धामाग्निदग्धा निधनैकसिन्धौ
मग्नारिभूमिर्ब्बत संहृतेव ।
नोदेति यस्यापि महावराह-
दंष्ट्रोद्धताद्यापि पुनर्व्विकीर्ण्णा ॥ 97
दध्वान भेरीरव पूरिताशा
यस्योच्चकैर्य्या जयघोषनायै ।
तद्धान मुद्वीचिरिवानु कुर्व्वन्
दन्ध्वन्यते सिन्धुधवोऽधुनापि ॥ 98
यशोभिरुद्यद्भिरुदात्तगीतै-
स्तिरोहितं यस्य यशोऽन्यदीयम् ।
ब्रीड़ादिवाद्यापि समाहृतं सत्
क्वापि प्रयाति स्वरितोपगीतम् ॥ 99
कीर्त्या सपत्न्यामपि चापलं स्वन्

निक्षिप्य लक्ष्मीरपुरर्ग्रहाय ।
छ्रियेव यं प्राप्य पतिं गभीर-
ङ्गाम्भीर्य्यमबन्धेर्जननाञ्जहार ॥ 100
लक्ष्मीञ्चलत्वात् सलिलन्द्रवत्वाद्
द्वेषन्द्विषद्भयी मरणं मनुष्यात् ।
उपायविद्वारयितुं प्रभुर्य्यो
नतु स्वकीर्त्तिन्दयितान्दि गन्तात् ॥ 101
वसुन्धरां सिन्धुचतुष्टयोद्यो-
निष्ठ्यतरत्नोद्धर दुग्धधाराम् ।
यज्ञाय यश् श्रोत्रिय बालवत्सां
समां समीनामिव गामद्युश्रत् ॥ 102
श्रद्धाभक्त्योरद्यगिरिभिदोर्व्विष्णुपादाश्रययिण्यो-
रेकान्तिन्योर्व्विधिजलनिधिंभिन्नयोस् संप्रयान्त्योः ।
मध्ये गङ्गारवितनय योर्देवनद्योरिवास
श्लाघ्या यस्य प्रतिदिन विवृद्धाध्वरारम्भ शोभा ॥ 103
द्यूमो न मापयितुमग्नि मुपात्त हव्यं
यज्ञेषु यस्य नभसा हुतिगन्धिरुद्यन् ।
सान्द्रो जगाम ककुभां विवरेषु देवा-
नावाहयन्निव दिवं सह वेदमन्त्रैः ॥ 104
शचीकचे हारि न पारिजात-
पुष्पं मखे यस्य सदोत्सुकेन्द्रे ।
जाताञ्जितारेरमरैर्व्विमुक्तं
संयन्मरवे सर्व्वमिवापरिष्टात् ॥ 105
प्रदक्षिणावर्त्तशिखश् शिखाभि-
र्हुतो हुताशो विततं वितानम् ।
भ्रान्तेषु पथ्यत्स्व परिभ्रमस्य
यस्यानुभावान् न शशाक दग्धुम् ॥ 106
मीमांसको नाकितभूर्व्विभूत्या
साक्षात्कृते दिव्य सुखोपभोगे ।

योऽधीत्य यज्ञायुधिनाद्विजानां
सत्यापयां वेदगिरश्चकार ॥ 107
धाामाब्धि हेमगिरि नागवरादि नून-
मम्भश्शिलेभ कलभ प्रमुखावशेषम् ।
इत्यास युक्त्यनुगता प्रतिगृह्यतां वाग्
रत्नाद्यसंख्यमिव यच्छति यत्रदिक्षु ॥ 108
येनार्थिनां पर्व्वविवर्द्धमाना
दानप्रवृत्तिः क्रमशः प्रयुक्ता ।
उच्चैः पदारोहण लम्पटानां
रव्राज सौपानपरंयरेव ॥ 109
शौर्य्यादयो यञ्जहतं श्रयन्तो
दुष्टान् प्रियानप्यवलोक्य सर्व्वे ।
शङ्केऽनुकर्त्तु गुणिनं गुणौधा
दुष्टं प्रियं रेजुरपास्य दर्प्यम् ॥ 110
अपूर्व्वमध्यैष्ट कुतोऽपि योगं
यो येन निर्द्दस्यु दधार राष्ट्रम् ।
डिम्बा ह्यभूवन्मद्युरवेटमाद्याः
प्रसह्यवेदादिहराः पुरापि ॥ 111
कान्तेर्गृणानां यशसां विवृद्धि-
धृतेर्द्धियां यस्य चवोर्य्यकीर्त्योः ।
प्राप्तपरां कोटिमपि प्रपेदे
पुनः पुनर्नूतनतामनन्ताम् ॥ 112
कचग्रहाल्लऽनमि वारिलक्ष्मी-
माल्यं यशो यो नु करे सुगन्धि ।
अवाकिरद्वासयितुं हतद्विड्-
वसाभिरुर्व्वीन्दिशि विस्रिताङ्गीम् ॥ 113
प्रासाद मध्यस्थित रत्नहेम-
हम्मर्येऽग्रयतेजः परिवारगेहे ।
धर्म्म्यारितापच्छिदि यस्य राष्ट्रे

प्रजा निविष्ठा मुमुदे दिवीव ॥ 114
व्याप्तस्य तेजोदहनस्य काम्या
कीर्त्तिर्व्विशुद्धा कथिता समीपे ।
फलानि दातुं सकलानि शक्ता
यं सामिधेनीव जिजार्थमाह ॥ 115
त्रातुन्त्रिलोकीं कलिकालकाल्यां
सन्दर्शयन्भृत्त मुवाह सर्व्वम् ।
वार्षध्वजन्ताण्डव पाटवं यो
निजं प्रयोगन्त्ववनेर कम्पम् ॥ 116
स्वस्मात् पदाद्विगलितास् सति पार्थिवत्वे
त्युच्चैः पदञ्चिरमवाप्तु निवोरुवाञ्छाः ।
यस्यारयश्चरणपङ्कजरेणवश्च
मूर्द्धोऽध्यशेरत मही भृदधी श्वराणाम् ॥ 117
गुणैकदेशैस् सदृशोऽपि कैश्चित्
सामीप्यमाने सति यस्य कश्चित् ।
सादृश्यभित्तत्क्षणमाम वैद्य-
श्चतुर्भुजस्येव चतुर्भुजोऽपि ॥ 118
पराङ्मुखी योषिदिवाचिरोढ़ा
सेना द्विषां साध्वसवत्यकारि ।
लक्ष्मीस्तु लग्नोरसि येन योद्धा
धृष्टा भुजिष्येव भृशं रसज्ञा ॥ 119
तिष्ठन्त्थने नांसि मनांसि साधो-
र्दुरात्मनामप्यति निष्ठुराणि ।
मलीमसानि प्रसभं प्रकृत्या
यो यांस्ययस्कान्त इवाचकर्ष ॥ 120
नौकावली यस्य रराजयाने
पूर्ण्णा पयोधौ सितसीतसार्था ।
गङ्गाम्बुवेगेन विसारितान्तम्
न्नीता समन्तादिव हंसमाला ॥ 121

जलधिललित वस्त्रान्तर्ज्जलोन्नुन्नरत्न-
प्रकर रचित चञ्चद्वीचिकाञ्चीकलापाम् ।
पृथुलगिरिनितम्बान्निर्म्मललच्छत्रवक्त्रां
स्त्रियमिव रमयां यः क्ष्माञ्चकारानुरक्ताम् ॥ 122
भुवनत्रितयाकीर्ण्णां यस्य कीर्त्तिम.......स्तव ।
कृशोऽपि तपसा गङ्गां भगीरथ इवावहत् ॥ 123
पूर्ण्णे वर्ण्णसमूहेन पदेयोऽयोजयत् क्रियाः ।
लोपागमविक्कारज्ञोऽप्यलोपागमविक्रियाः ॥ 124
यस्य स्तम्भादिवद्गम्यः.....................।
अभावगम्मोऽत्यन्तासन्दीषस्तु शश शृङ्गवत् ॥ 125
पुरुषग्रह्वणं स्थाणैमिथ्याज्ञानं परेष्वापि ।
यस्मिन् परमगम्भीरं सम्यक् ज्ञानमजायत ॥ 126
श्रीयशोजन्मभूमित्वन् नयन्नयपराक्रमौ ।
भूर्भुवस्स्वश् श्रिय मिवामृत तद्भाजियो.......॥ 127
.................( ब )लवान् वीरो रूपबान्धीधनश्च यः ।
पञ्चानां पाण्डुसूनूनामेकादेश इवाभवत् ॥ 128
साक्षात्कृते शिवे शान्तं कृतार्थं गोपरिग्रहे ।
यो दानवारिसंसक्तं करं मन इवाकरोत् ॥ 129
पुनः पुनरिवारिप्सुरश्वमेध क्रतुक्रि( याम् ) ।
.........ति योऽद्यापि दिक्ष्वहार्य्यं यशोह( य )म् ॥ 130
नित्या जनितभङ्गातन्द्रित् प्रारम्भं फलोन्मुखम् ।
कुन्त्येव कर्ण्णं सोदर्य्यो यस्यारम्भोऽर्जुनेऽवधीत् ॥ 131
मनस्थे पश्यतां यस्मिन्सर्व्वकान्तातिशायिनि ।
मनीजत्वमनङ्गस्यनिवृत्त..................................॥ 132
सहस्रवर्त्मनि गुणे गीते यस्य बृहद्गुणे ।
स्मृतिरुद्धेतरगुणश्रुतिस् साम्नीव शाम्यति ॥ 133
यदीयं शरमृत्स्नाभिर्य्यशः कामेन कान्तिजम् ।
हृधं हृदि वरस्त्रीणां लग्नं लिखितमक्षरम् ॥ 134
चतुर्द्दशप्रकाराभिर्य्यो विद्या( भिर् )...........।

धातेव मन्वस्थाभिर्ब्बभार भुवनस्थितम् ॥ 135
जभिषेकाम्भसा यस्य सिक्ता कतिपयापि भूः ।
सार्व्वभौमस्य सन्तापं सर्व्वभूमेरणहरत् ॥ 136
यस्य विन्यास एवासीद्रत्नसिंहासने पदोः ।
भूभृन्मूर्द्धसु भारस्तु यत्तेय...............॥ 137
धृतमेकसित्चछत्रं यस्य मूर्द्धिव्यराजत ।
मुखोपमार्थी वासन्नचरं पूर्ण्णेन्दुमण्डलम् ॥ 138
गौरीं हरशरीरार्द्धहरां वीक्ष्येर्ष्ययैव यम् ।
श्रीरालिलिङ्गे लग्नाङ्गी वादृशी स्यामिनीश्वरम् ॥ 139
प्रकृतिर्य्यस्य शुक्ल................रञ्जिता ।
तथाप्यतीव विदिता वर्ज्जिता वर्ण्णसंकरैः ॥ 140
पुरस्कृत्य कृती वह्निं वह्नितुल्य पुरोहितौ ।
सभां वेषी विवेशाग्निस्तृतीय इव यस्तयोः ॥ 141
योगोतो गुरुरेकोऽपि लघुदण्डोऽन्वशात् प्रजाम् ।
चण्डदण्डधरन्धर्म्मराजं प्रत्यदिशन्नि( व ) ॥ 142
.........देकपद्धर्मः कलिना वकलः कृतः ।
अष्टादशपञ्चैत येनाष्टादशपादिव ॥ 143
निशायामपि युञ्चानो विधाय विधिमाह्निकम् ।
व्यवहारे निरास्थद्यो दोषामासमनागसः ॥ 144
यानायानीन्द्र चापापि सेन्द्रचापेप य( ं )शरत् ।
नम्रराजशिरोरक्तरत्नां शुमिरचोदयत् ॥ 145
दिग्जयायाभिजातो यो बलोद्धतेन धुक्षितम् ।
व्यक्तकेवलसत्वोऽपि रजसाजीजनत्तमः ॥ 146
संहारेऽनेन तप्तास्मीतीव रोषाद्वसुन्धरा ।
श्रीसग्र्गाय रजीभूता याने यस्याक्र्कमावृणोत् ॥ 147
तेजस्वित्वे समाने पि धूमन्धूमध्वजाध्वजम् ।
जग्राहाजिजयैर्जुष्टन्तेजो जाज्वलितन्तु यः ॥ 148
विवृद्धा वाहिनी यस्य प्रावृषीव शरद्यपि ।
बभञ्ज विभ्रमेनैव भूभृतो माग्र्गरोधिनः ॥ 149

विभिद्यशात्रवं व्यूहं योऽविशच्चक्ररक्षितम् ।
गरुत्मानिव माहेन्द्रञ्ज यामृतजिधृक्षया ॥ 150
क्षतनक्षत्रन्नक्षत्रनाथान् यस्तेजसा जयन् ।
रणरङ्गाम्बरारूढ़ो रेजे रविरिवोदितः ॥ 151
यो धुन्वन्नुद्धनिधनुर्धनुर्व्वेद इव स्वयम् ।
साक्षाद्भूतो धनुश्शिक्षा सौष्ठवं समदर्शयत् ॥ 152
धनुर्ज्योधातमङ्कारा भुक्ता येन शिलीमुखाः ।
वैरिवक्त्रारविन्देषु रक्तमध्व पिब नूणे ॥ 153
रक्ताक्तासिलता यस्य कृत्तैश् शिलष्टा भुजैर्द्विषाम् ।
ज्वालेव सर्प्पसत्राग्नेः पतत्सर्प्पार्ब्बुदा बभौ ॥ 154
यस्यासिवपुसी दृष्ट्वान्तकालज्ञा इवात्मनः ।
व्यगाहन्तारयो गङ्गाकालिन्दी सङ्गमाशया ॥ 155
धनापकारिणो भूभृत्पक्षानुत्थानवेगिनः ।
योऽमांक्षीद्भुजब्रजेण जम्भारिरिव जृम्भितः ॥ 156
सकलन्यायकुशलोऽप्येकवीरो रणेरणे ।
सिंहावलोकितन्यायमन्यायमिव योजद्यौ ॥ 157
प्रेंरवत् खड्गेन येनानौ बेगोत्कृत्तमनेश्शिरः ।
स्वर्ग्गतं स्वान्तरात्मानं ऊद्ध्वोच्छल दिवान्वगात् ॥ 158
तेजस्विनोऽरेरस्तैर्य्यो रञ्जितोऽतीन भासुरः ।
स्वभावभासुरो मेरुरिव रत्नमरीचिभिः ॥ 159
जयश्रीरसिधारायां येनापि स्थापिता स्थिरम् ।
पुष्कलान् पुष्णती कामान् प्रजोदयमबर्द्धयत् ॥ 160
प्रत्यादिशन्तीवाकीर्त्तिमैन्द्रीमिन्द्रजिता क्लताम् ।
यस्य वैजयिकी कीर्त्तिर्व्याप्योर्व्वी व्यश्नुतेदिवम् ॥ 161
जघानारि कुम्भालीं भिन्नां श्रीकबरीभिव ।
योऽसिनीलोत्पलेनोद्यन्मुक्तान्तः कुसुमावलिम् ॥ 162
अनित्यं संस्कृतं सर्व्वमिति वादन्नुदन्निव ।
नित्यमात्मयशोऽधत्त यः पराक्रमसंस्कृतम् ॥ 163
पुंवत्प्रगल्भा कान्तापि यमनैषीद्रणक्रिया ।

लक्ष्मीमजमनन्योक्तां सुनन्देन्दुमनीमिव ॥ 164
धात्रा भुवन सन्तापविध्वंसक्षमलक्षणा ।
मुदाद्ययि ध्रुवं यत्र कामाकान्तिरनश्वरी ॥ 165
जिज्ञासुरिव यत्कीर्त्तेर्ग्गतिमानञ्जगत् त्रये ।
प्रसारित करोऽद्यापि प्रयाति............... ॥ 166
स्रविवादात् कलाहानिरिन्दोरिति हरोन्वदात् ।
यत्नाद्विनीय वीतेर्ष्या यत्र भूभारतीश्रियः ॥ 167
खङ्गखण्डित दन्तीन्द्रदन्तषण्डोज्ज्वलानलैः ।
यश्चक्रे दीपिकाकोटिभाजिरात्रौ जयश्रियः ॥ 168
वीतनिद्रं प्रजाबृद्धौ यस्य भ्रमति शासनम् ।
स्मरणादिव दैत्यारे..........विश्वसंहृतः ॥ 169
दीक्षितो रणयज्ञाय भित्त्वा योमित्रमण्डलम् ।
प्राप्तोऽप्यनामयपदं प्रियां भेजे जयश्रियम् ॥ 170
पद्मार्थी भीमसेनो यो भूमृदहनपारगः ।
दिग्राजराज्यमकरोद्ध्वस्त कान्तालक्राकुलम् ॥ 171
यस्याधुनापि न व्येति कीर्त्ति.............।
लग्नया मन्दरगिरौ पृक्तेवामृतविप्तुषा ॥ 172
येनोद्ग ता दिवि युधिच्छिन्नद्विव्मूर्धमौलयः ।
नत्ताभूषा इव यशोगादिदिव्याङ्गनागणे ॥ 173
यत्कीर्त्त्यै काण्र्णवप्रान्ततरण क्लान्तशक्तयः ।
हेमाद्रिमूर्द्धपुलिने विश्रान्ता विबुधा ध्रुवम् ॥ 174
...............नद्धपद्मर्द्धिद्विषद्ध्वान्त विमर्द्दिनी ।
महभृन्मूर्द्धिन यस्याज्ञा प्रभा भानोरिवाबभौ ॥ 175
श्रीस्स्थितोरः कुवलये श्रीधरेण छतोदधेः ।
श्रीप्रिये येन तु यश श्श्रीराजेर्द्दिङ्मुखाम्बुजे ॥ 176
दृशि पद्मद्युतिं पाणौ पृथिवीं वक्षसि श्रियम् ।
बिभ्राणौ योऽपि भू..........णितः परमेश्वरः ॥ 177
भूमिभृन्मथनं बिभ्रद्विलसद्रत्न भूषणम् ।
यस्य विष्णोरिव बभौ वक्षश् श्रीरतिमन्दिरम् ॥ 178

भास्वत्ततरो भूरि मण्डलालं कृतोन्नतिः ।
भूमृद्भर्त्ता महिम्ना यो मेरोर्नात्यचरत् स्थितिम् ।। 179
दुर्योधनद्विषन् नीत्वा भङ्ग..............जसा ।
जयश्रियमशल्यां यो धर्म्मराजोऽन्वपालयत् ।। 180
युद्धाब्धिमथनाल्लब्धं यशोरत्नञ्जगत्त्रये ।
अस्वार्थमेव येनापि श्रीधरेण व्यकीर्य्यत ।। 181
यस्त्रिलोकी प्रियां प्रायश्चलच्चन्द्रार्क्कलोचनाम् ।
.........................णपाणमपाययत् ।। 182
यत्पाद कल्पावृक्षोऽपि कामदो नादितश्रियम् ।
दृप्तारौ हि वदन्यत्वन् नतिस्साधयतीश्वरे ।। 183
अहो स्वभावो दुस्त्याज्यो यद्वक्षःस्थावरीकृता ।
येनारि हृदयाह्लादहारिणीश्रीः क्षणंक्षणम् ।। 184
पूर्ण्णेन्दो राहुणा अस्तात्कामील्लीढान्नु वह्निना ।
कान्तिद्रुता मुखाम्भोजे यस्याङ्के चामयेश्रिता ।। 185
एतावता बुधैरुक्तो पदज्ञश् शाब्दिकोऽपियः ।
नास्तीति याचकगणं यन्नोवाचकदाचन ।। 186
नेत्रेन्द्रियेण कामस्य दर्प्पञ्जेतारमेकदा ।
प्रत्यादिशन्निवेशं योऽजयत् सर्व्वेन्द्रियैस् सदा ।। 187
शक्तिबुद्धिगतीनां योऽधरीचक्रे महोदयेः ।
धराम्भोनिधिमेरूणां क्षमागाम्भीर्य्यधीरताः ।। 188
प्रधानगुणसंसिद्धैय न्यस्तं येन त्रयन्त्रिषु ।
अभियाने रजो धर्म्मे सत्वन्द्विङ्हृदये नमः ।। 189
विमत्सरो वनगतो यतितुल्योऽप्यरातिराट् ।
न कश्चिदगमन्मोक्षं यस्माद्भीतो भवादिव ।। 190
वनं रिपुपुरीकुर्व्वन् वनीकुर्वनरिपोःपुरम् ।
यः पदार्थविपर्य्यासमितिशब्द इवाकरोत् ।। 191
पूर्ण्णेन्दुन्मुदितन्दृष्ट्वा यस्यास्यस्मरणाद् द्विषः ।
ज्योत्स्नाभिरद्रेस् सन्तप्राश् शीतलेपि शिलातले ।। 192
कृतानुरागश् श्रीकण्ठे मण्डलाग्रधुरन्धरः ।

वृत्तोरुव्र्ययिस्थेयान् यस् स्वबाहुरिवाबभौ ॥ 193
दोषोद्धारङ्गुणोत्कर्षं वंशजानां शुभांगतिम् ।
यो धनुर्म्मण्डल इवाकार्षीत् प्रकृतिमण्डले ॥ 194
निहतारातिहरणं राजेन्दोरपि मण्डलम् ।
यस्य तछयितोन्मुक्त वाष्पाम्भोमिरलक्ष्यत ॥ 195
हतानां यद्यशश्शौर्य्यं गीतं स्वर्ग्गाङ्गनागणैः ।
द्द्यं हृन्माथिचारिणां मन्मथस्येव शासनम् ॥ 196
मिग्रहानुग्रहौ भास्वान् मार्ग्गावुत्तरदक्षिणौ ।
यः पर्य्यायेण संक्रान्तो मध्ये समरसस्तयोः ॥ 197
समाप्य रणयज्ञं यो वसुभिद्दिट् पुराद्धतः ।
आरेभे वैदिकं विद्वान् युधिष्ठिर इताध्वरम ॥ 198
प्रजर्द्धिरधिका यस्य सुरभीज्यामनुज्झतः ।
प्रजालोपो दिलीपस्य प्रागभूत्प्रोज्झतस्तु ताम् ॥ 199
यस्याध्वराग्नि संपर्क्कमिवापन्नस् समण्डलः ।
धूमैरदृष्टश्छन्नोऽर्क्को हविर्भागजिधृक्षया ॥ 200
सर्व्वरत्नैः स्थिरा यस्य दानवृष्टिर्हिरणमयी ।
क्षणिकाम्भोदमुक्ताभिर्वृष्णो वृष्टिस्तु वैद्युती ॥ 201
दानैकार्ण्णवमग्नापि दीप्ता यज्ञानलैरपि ।
रराजोध्यमध्यस्था यस्य स्थितिधरा धरा ॥ 202
समस्तं योऽकरोद्राष्ट्रमवाष्पन्नप्रभूभृताम् ।
स्वास्मिन् हरस्तु सहते श्वशुरे वाष्पवाहिनीम् ॥ 203
यो विक्रमन्नयायासशङ्का शार्ङ्गी नुनाशयम् ।
चक्राम कृत्स्नमेकेन विक्रमेण पुनर्जगत ॥ 204
तापनाह्लादनक्षत्र गुणार्क्केन्दुकरान्वितः ।
सन्ध्योदय इवोपास्यो मन्त्रिणां योऽनतिक्रमात् ॥ 205
अतस्मिंतदिति प्रायः प्रत्ययं हेयमेव यः ।
गुणेषु रत्नग्रहणाद महीद्व्यसनीकृतात् ॥ 206
मारीच इव रामस्य नामाद्येकाक्षरश्रवा ।
यस्यारिराजो वीरोऽपि जगामानन्यजांभियम् ॥ 207

नानाकारस्वदेहार्द्ध सन्ध्यनादरिणाविव ।
शार्ङ्गी श्वरौ तदर्द्धम्यिां यञ्चक्रतुरतादृशम् ।। 208
न केवलं पदविधौ यद्वाग्वर्ण्णविधावपि ।
व्याप्तता नोपमेयैव समर्थरिभाषया ।। 209
जगतां बर्द्धयन्बीजं क्षतात् त्राणं वितन्वता ।
नाङ्गकान्त्यैव जात्यापि येन कामो विनिर्ज्जितः ।। 210
सुदक्षिणान्दिलीपं यः प्रतिगृहनन्तमध्वरे ।
अजैषीत् क्षत्रधर्म्मेण तां पात्रेषु तुदत्तवान् ।। 211
रक्षितं येन सौजम्यमसाधारणभूषणम् ।
रत्नं कोस्तुभनामेव द्दधन्नारायणोरसा ।। 212
शप्ता दुष्टस्वरेणैत्य दधीचं स्वर्ग्गता पुनः ।
यन्तु सुस्वरदत्ताशीर्भारत्यद्यापि भूरता ।। 213
पराक्रमद्वन्द्वं यद्यशोऽपि नपुंसकम् ।
दिक्स्त्रीषु रक्तं परवल्लिङ्गत्वादिव विश्रुतम् ।। 214
सीतां लब्धुमशक्तोऽरिर्य्यस्य मन्दोदरीरतः ।
श्रीमदादित्यविद्वेषी रावणाभो निशाचरः ।
शून्यानात्मादिवादं यो युक्त्या परिहरन्निव ।
सर्व्वत्र व्यापिनीमात्मविभूतिं प्रत्यपादयत् ।। 216
य एकोऽसंख्यगुणवान् कुतार्क्किकजिगीषया ।
प्रादुरासीद् गुणगुणिव्यतिरेकं वदन्निव ।। 217
न केवलं गन्धवती क्रियते भूस् सुगन्धिभिः ।
यशोभिर्य्यस्य दिक्चक्र कीर्ण्णैर्द्योरप्यतद्गुणा ।। 218
प्राक् प्रयुज्योपसर्ग्गं यश् शास्त्रज्ञः परम् ।
धातोरिव रिपोरर्थ प्रतिपत्त्यै पदं व्यधात् ।। 219
यशञ्चन्द्रस्य जनको दशदिग्गर्भगामिनः ।
अनसूयानुयातो यो रराजात्रिरिवापरः ।। 220
पुराणार्थनुरक्तोऽपि वृद्धवाणीप्रियोऽपियः ।
नवार्थ एव केनापि काव्येऽराङ्क्षीन्मनोहरे ।। 221
निष्कलेऽपि शिवे नित्यसंसक्तस् सकलीकृते ।

सकलां य कलां प्राप चन्द्रार्द्धो नतु जाऽयतः ॥ 222
स्वीकुर्व्वन्त्युन्मतिं सर्व्वां वर्णिर्णता यस्य सद्गुणाः ।
तथा हि लज्जाव्याजेन मुखमप्यानतन्तदा ॥ 223
कौमारन्दधता यो नु कार्त्तिकेयेन केवलम् ।
जरसा वर्ज्जितं प्राप्यमप्राप्तं प्राप यौवनम् ॥ 224
अकार्य्यं पृष्ठतः कारमनुशिष्टा प्रजाखिला ।
येन प्रियहितं प्राज्यमन्योन्यस्य व्यतिव्यधात् ॥ 225
तिर्य्यक्कृत्य कृती कृत्यं कृत्सनं प्राक्कृतिभिः ।
शास्त्रोक्तं यः प्रकृतवान् नवीनमकृतं परैः ॥ 226
प्राप्य हीनानुबन्धं यद्गुणं कीर्त्तीन्द्धलंकृतम् ।
नष्टा हरजटाजूटकीर्त्तिर्गङ्गेव भूभुजाम् ॥ 227
यस्यापि नित्यवीप्सार्थं केवलन्न द्विरुच्यते ।
यशोऽनुरक्तैस्कविभिः कोटिकृत्वोऽप्यसंभ्रमैः ॥ 228
एतावतानुमेयो यो योद्धा शस्त्रविदां वरः ।
द्विषं साङ्गभिवानङ्गं यच्चि च्छेदासिधारया ॥ 229
जाताः प्रजापतेर्य्यस्माद् दक्षान् मेधादयो दश ।
दशाङ्गायैव धर्म्माय दयितास्तस्थिरे स्थिराः ॥ 230
कान्तिन्दृष्टां पुनर्दृष्ट्वा द्वौ पुरूरवसः पुरा ।
विबुधावूचतुः क्षीणामृद्धां यस्य तेऽखिलाः ॥ 231
यमस्य महिषाकर्षादिवाप्तुन्धर्म्मराजताम् ।
यस्योर्व्वी महिषी छद्मा दक्षिणाशां सदान्वगात् ॥ 232
यस्य प्रशासतो राष्ट्रेऽप्यैकागारिक वर्ज्जिते ।
केनापि दृष्ट्या कान्त्या हृतं सीमन्तिनीमनः ॥ 233
बृद्धानुशासन सुधासिन्धौ भग्नोऽपि योऽनिशम् ।
बृद्धभूवराङ्ग श्रीलङ्खनञ्चरणं व्यधात् ॥ 234
रजस्तभोम्यान्निर्म्मुक्तो युक्तस् सर्व्वगुणैरपि ।
प्रकृतिर्योऽपि बुद्धयादेः परमः पुरुषोमतः ॥ 235
लक्षशो लक्षहोमाग्नौ हुतं यस्यापि होतृभिः ।
सर्व्वबीजमिवाम्बूप्तं महत् फलमजीजनत् ॥ 236

चोदितौ सूतमगधौ पुरा तुष्टुवतुः पृथुम् ।
स्तवीति स्वरसेनैव यन्तु सर्व्वमिदञ्जगत् ॥ 237
भूमृत्यनग्रे विध्वस्ते स्वभूभृत्वभयादिव ।
छिन्नपक्षापदेशेन नमन्ति गिरयो नु यम् ॥ 238
श्रीसोमेश्वरभट्टाद् यो मीमांसां श्रूतवान्द्विजात् ।
बुधान् व्याख्यातवेदार्थां बह्मण्यानध्यजीगमत् ॥ 239
राजपद्धतिरद्यापि यत्प्रणीता प्रकाशते ।
यया याता नृपतयो लोकद्वयहितैर्य्युताः ॥ 240
निष्कलङ्कतया नेव शशाङ्कं प्रजहास यः ।
अपक्षपातपूर्ण्णेन मण्डलेनाप्यहर्न्निशम् ॥ 241
राज्यन्नपुंसकावस्थामपि प्राप्तं प्रजार्द्धिकृत् ।
बभौ विजितवैरीन्द्रं यस्य जिष्णोरिवेहितम् ॥ 242
भ्रमिता मन्दरभ्रान्त्या लक्ष्मीरमृतमन्थने ।
अभ्रान्तं मेरुमिव यं सुवर्ण्णं प्राप्य सुस्थिता ॥ 243
ब्रह्माण्ड कोटरेऽप्यल्पे यशो येनोरु दर्शितम् ।
कृष्णेनेवास्यकुहरे त्रैलोक्यं सर्व्वशक्तिना ॥ 244
नीत्याशिषत् कम्बुपुरीं वागीशस्य पुरोधसः ।
गीर्व्वाणवारितारीन्द्रां यो बज्रीवामरावतीम् ॥ 245
शमितेऽप्यन्वशाद्दुर्ग्गं दुर्ग्गमं योऽरिमण्डले ।
मेरुं कुर्व्वन्त्यबध्या हि धाम वेद्योहरीश्वराः ॥ 246
प्रधानभूता भूतेषु गुणा यस्मिन्प्रशासति ।
गुणीभूतानि भूतानि व्यत्ययोऽपि महोदयः ॥ 247
श्रीकेसरं यशोगन्धं साम्राज्यसरसि स्फुटम् ।
यत्पाद जलजं रेजे दुष्टं राजन्यषट्पदैः ॥ 248
मृदूचकार यश् शस्त्रमसंख्यं संयति द्विषाम् ।
हरस्तु कुसुमास्त्रैक कुसुमास्त्रमृद्कृतः ॥ 249
यस्य दण्डयतो खण्डं दण्डयान् देदीप्यते यशः ।
अदण्डयादण्ड नाम्भोधेरिन्दु बिम्बमिवोदितम् ॥ 250
दत्तेभशतदानाम्बुमत्तेव विततेऽध्वरे ।

परिभ्रमति यत्कीर्त्ति रद्यापि भुवनत्रये ॥ 251
कमलोत्कापिदित्वैव कमलं कण्टकान्वितम् ।
यस्यागाद्बाहुकमलं कमला हतकण्टकम् ॥ 252
ब्रह्मार्थितो विशुद्धो यश् शुद्ध एवशिवस्त्वसौ ।
शुद्धस्फटिकवर्ण्णोऽपि भूयोऽभून्नील लोहितः ॥ 253
यत्प्रतापानलोऽधाक्षीद्वाहिण्यन्तर्ग्गतानपि ।
वैरिणस् संमुखीनान् किं पुनः काष्ठान्तरद्रुतान ॥ 254
एक एवैकजलधौ प्रसुप्तः पुरुषोत्तमः ।
यत्कीर्त्येकार्ण्णवे स्तोत्र प्रबुद्धा बहवस्तुते ॥ 255
यस्य स्तवायापि कविप्रयत्नानन्तरीयकम् ।
चरितामृतसंपर्क्कात काव्यन्न व्येति वेदवत् ॥ 256
भीता भीषयमाने भूः किञ्चिदेवादिशत् पृथौ ।
दत्वान्येषु बहुक्षीरं यस्मिंस्त्वभयदेऽखिलम् ॥ 257
जहत्स्वार्थाभिमुख्येन परार्थप्रतिपादने ।
वृत्तिर्य्यस्य समासादिरिव सामर्थ्यमण्डिता ॥ 258
मोक्षप्राप्तिनिमित्तेन तत्त्वज्ञानेन भास्वता ।
समन्वितोऽपि यो नैव विमुक्तो हृदयान् नृणाम् ॥ 259
एकत्रैवात्मनो गात्रे व्यधाद् भूतिं रजोमयीम् ।
हरो यस्तु जगन्नाथस् सप्तस्वङ्गेषु सात्विकीम् ॥ 260
निष्कामोऽपि परस्वेषु यो वदन्योऽपि पाटवम् ।
दातुं नालं स्वमन्यस्मै जग्राहान्यस्य केवलम् ॥ 261
जयः परानयो वास्याद् इत्याशङ्कान्ययोद्धषु ।
यस्मिंस्तु जय एवासीदसन्दिग्धो रणेरणे ॥ 262
श्रीरहो निष्ठुरा युद्धे यत्कुचाभ्यामताडयत् ।
रुग्णनिध्नदरातीभदन्ताग्रं यदुरस् स्थलम् ॥ 263
नालौकः करकीर्ण्णासु पुष्पवृष्टिषु योजयी ।
विस्पर्द्धीवाकिरद् योद्धा कीर्त्तिमन्दारमञ्जरीः ॥ 264
भूषां बद्धनन्निवापूर्व्वा खण्डमूषे भवेऽधिकाम् ।
यश श्चन्द्रसहस्राणि योऽखण्डान्यदिशद्दिशि ॥ 265

यद्वपुस्सहकारस्य लग्ना कान्तिफले नृणाम् ।
दृग्भृङ्गी कीर्त्तिकुसुमाकृष्टा निर्ग्गन्तुमक्षमा ॥ 266
आत्मानमीश्वरं वक्तुं यो वाञ्छन्निव कारणम् ।
प्रकृतावेनुदासीनः कर्त्तव्यमकरोत् कृती ॥ 267
देवान् यश् श्रीन्द्रवर्म्मश्रीयशोवर्म्मादिभिनृपैः ।
स्थपितान् कल्पिते स्थेयो यज्ञाङ्गे तरतिष्ठिपत् ॥ 268
यशोधरतटाके श्रीयशोवर्म्मकृते कृती ।
अदृष्टमपि धर्म्मं यः प्रत्यक्षं समदर्शयत् ॥ 269
कम्बुविश्वम्भरायां यस्त्रिदशानां स्वयम्भुवाम् ।
स्थापितानाञ्च यज्वैको भूत्वा पूजामवर्द्धयत् ॥ 270
राजेन्दुना येन यथा यथा श्री-
भद्रेश्वरेऽदीयत मण्डलश्रीः ।
तथा तथावर्द्धत निष्कलङ्का
चन्द्रश्रियं छेपयितुं मुदेव ॥ 271
चम्पाधिपं बाहुबलेन जित्वा-
ऽयच्छच्छिद्रयं यो हरये तदीयाम् ।
स्वयम्भुवे रोद्यसि विष्णुपद्मा-
श्चम्पेश्वराराख्यामिव कर्त्तुमर्ध्याम् ॥ 272
सितानदीतीरकृतास्पदायै
द्वारत्रयं योऽदिशदेव नद्यै ।
यथाख्यमेषा त्रिपथेन गच्छ-
त्वितीव हैमं सह भूरिभोगैः ॥ 273
यशोधरायेन पुरीपरोक्षा
धर्म्मार्थैकामैरियमम्मपूरि ।
कृत्वा पुनर्भारत संहितैव
वेदैस्त्रिभिस् सत्यवती सुतेन ॥ 274
याञ्चा यशोवर्म्मनृपस्य योगा-
चारोक्तविज्ञप्तिरिवार्थ शून्या ।
धर्म्म्या स्वधर्म्मोद्धरणोद्धतेन

येनार्थवत्तां गमिता त्रयीव ॥ 275
मग्नान्यभूभृत्कुलमान शृङ्गे
प्युच्छ्रायभागत्त तटाकपद्मे ।
यन्मान विष्णुर्भुवनं विलङ्घय
पदं व्यधात्तूर्य्यपदावदातम् ॥ 276
स श्रीराजेन्द्रभद्रेश्वर इति विदितं लिङ्गमत्रेदमग्रयं
गौरीशौरीश्वराणाञ्चत सृमिरभिरामा मिरच्र्चाभिरामिः ।
कीर्त्ति वक्तुं प्रसन्नं मुखमिव मुदितस्योर्ध्वमास्यैश्चतुर्भिश्
शम्भोर्भास्वद्भिरिद्धे शिखितनुवसुमिस् स्थापयामास शाके ॥ 277
तेनागिमाधैर्न्निहितो गुणैश् श्री-
राजेन्द्रवर्म्मेश्वर ईश्वरोऽयम् ।
अष्टाभिरिन्द्रादिभिरात्मभूत्यै
भूपालभावस् स्व इवाग्निदिक्स्थः ॥ 278
राजेन्द्र विश्वरूपेश्वरोऽपि विश्वाकृतिर्हरिर्हारी ।
त्रिभुवनकेवलकान्तिप्रकर इवाकारि तेनास्मिन् ॥ 279
श्रीहर्षदेवजननीजयदेव्यास् स्वर्ज्जयाय जनितश्रीः ।
जननीजघन्यजायास्तेनेह स्थापिता गिरिजा ॥ 280
राजेन्द्रवर्म्मदेवेश्वरभीश्वरोऽवनीशानाम् ।
श्रीहर्षवर्म्मनृपतेरनुजस्य स भूतये कृतवान् ॥ 281
सिद्धा दशाध्यात्मिकलिङ्गलक्ष्याश्
शार्ङ्गयादितार प्रतिमाभिरामाः ।
मूर्द्धेन्दुनिष्ठ्यूत सुधोरुधारा
इवाष्टमूर्त्तीरकृताष्टमूर्त्तेः ॥ 282
त्रैलोक्यलक्ष्मीरिवलोकपालै-
रष्टाभिरासादित राजभावैः ।
पुञ्जीकृतेषु क्षितिपेन तेन
देवेषु द्दत्ता विविधा विभूतिः ॥ 283
सुवर्ण्णभोजी मणिराशिसान्द्रस्
समुद्रवत् तत्परिकल्पितोऽस्मिन् ।

वेलविबृद्धोऽस्त्यनतीत्य देव
पूजाविधिस्तूर्य्यरवोर्म्मिनादः ॥ 284
इन्द्रेण तेनाधिकृतैः पयोदैः
पुंमिस स्वधर्मैकरसं प्रदेयम् ।
सषड्रसं पात्रवशात् समाप्य
दैवीं पयोदिव्यमिवान्नभिज्याम् ॥ 285
भविष्यतः कम्बुजभूभुजश् श्री-
राजेन्द्रवर्म्मा विदितो वदन्यः ।
स याचते याचत इत्युदारं
रक्षन्तु धर्म्मं स्वामिमं भवन्तः ॥ 286
आत्मायमेको बहुधाविभिन्ने
कर्त्तोपभोक्ता चयतश् शरीरे ।
ततस् स्वधर्म्मग्रहणं बुधाना-
न्धर्म्मेषु सर्व्वेषु विबर्द्धतांवः ॥ 287
उपाधिभेदादपि कर्त्तृभेदो
यः कल्पितः कर्म्मकलानि भेत्तुम् ।
भाक्तस् सभेद्यः परमार्थबुद्धया
भासेव भानोरनयान्धकारः ॥ 288
लब्धा धारित्री तपसा भवद्भि-
रस्यां यदस्तीदमशेष मेतत् ।
संरक्षणीयं क्षणमप्युपेक्ष्यन्
न स्यान्निपीडेयत यदीह कैश्चित् ॥ 289
क्षतात् परित्राणविधानलिङ्गा
क्षत्रोक्तिरेषाब्जभुवो भुजाद्रवः ।
प्रसूतिभाजां भुजवीर्य्यभूरि-
भूषाभृतां भासयतात् स्वमर्थम् ॥ 290
निद्रायुजां राज्यसुखे श्रियापि
धर्म्मो विपद्येत यदा तदास्तात् ।
प्रबोधनं वस्तृदुपक्रियायै

नारायणस्येव वयः पयोधौ ॥ 291
यतो निमित्तादददितेस् सुतत्वं
स्रैणञ्च विष्णुर्भगवान् जोऽपि ।
शिवो जगामाम्बुजजन्मनश्च
तदस्तु धर्म्मस्थिति पालनं वः ॥ 292
यमाभ्युपेता नियमाभिरामा
रामेव सा सत्यवतः प्रियास्तु ।
दत्तान्धदृष्टिर्द्दधती धृतिर्व्वो-
यशश् शरीरे मम धर्म्मजीवम् ॥ 293
श्लादिदेवस्वभिदञ्जिधृक्षु-
र्भूषायमानं विषमेव कस् स्यात् ।
श्रीकण्ठकण्ठस्थित कालकूट-
मिवेति बुद्धिर्व्विदुषान्दृढ़ावः ॥ 294
भूयास्त यूयञ्चिरमात्तराज्या
धर्म्मोत्सुका स्त्यागगुणैर्व्वारिष्ठाः ।
तेजोऽधिकाः कोशबलर्द्धिमन्तः
करन्धमाद्या इव पूर्व्वभूपाः ॥ 295
कुलीनमुल्का कुलजेव कन्या
भवद्विधं प्राप्य पतिम्बरैषा ।
शालीनतां मार्द्दवमानयन्ती
याञ्चा निजन्नो विवृणोति भावम् ॥ 296
स्वर्ग्गापवर्ग प्रशमैक वीथी
वाणी ममैषेश्वर स्मूर्द्धमाला ।
गम्भीरमानन्दयतान्मनो वो
मन्दाकिनीवाम्बुनिधिं प्रविष्टा ॥ 297
मरणमिदमिनानां याचनं युक्तमुक्तं
कृतिभिरमिमतार्थ प्राप्तये यत् प्रयुक्तम् ।
तदमृत मनुगम्यन्धर्म्मसंबर्द्धनार्थं
यदभिमतमतोऽहन् धर्म्मरागेण याचे ॥ 298

**अर्थ–**

पूर्व दिशा में ऋग्वेद की स्तुतियों के द्वारा अर्चियाँ फैलाते हुए अग्नि के रूप में, यजुर्वेद की स्तुतियों के द्वारा दक्षिण दिशा में प्रवाहमान वायु के रूप में, सामवेद की स्तुतियों के द्वारा पश्चिम दिशा में रश्मि समूहों के अधिष्ठान चन्द्रमा के रूप में तथा सभी रूपों में एक साथ उत्तर दिशा में प्रकाशित होनेवाले शिवजी को नमस्कार है ।। 1

जो अशरीरी और अद्वितीय होते हुए भी संसार के जन्म, पालन और विनाश की सारी शक्तियों के आधार रूप में, ओंकार से ब्रह्मा, विष्णु और महेश– इन तीन रूपों में बार–बार प्रकट होते हैं; जो योग और योगी– दोनों हैं; सब जिनके वशीभूत हैं तथा वेदान्त के जो एकमात्र प्रतिपाद्य हैं, उन वैभवशाली शिवजी को नमस्कार है ।। 2

जिन्होंने चन्द्रमा में अपनी सृजनशालिनी ब्राह्मी शक्ति सावित्री को, जगत्पालिनी शक्ति वैष्णवी को सूर्य में तथा विनाशकारिणी भूतशक्ति रौद्री को अग्नि में स्थापित कर रखा है, जो द्रष्टा, दृश्य और दृष्टि– इन तीनों सृजित रूपों में सूक्ष्म शरीर से विद्यमान हैं तथा तत्त्वज्ञानियों में जो सर्वश्रेष्ठ हैं उन रजोगुण को धारण करनेवाले ब्रह्माजी को हमलोग नमस्कार करें ।। 3

सत्त्व, रज, तम– इन तीनों गुणों को अतिक्रमण कर नित्य पद में जो स्थित हैं, जो इन्हीं तीनों गुणों के द्वारा चार प्रकार से विविध रूपों में व्यक्त हुए हैं तथा जो निराकार होते हुए भी विश्वाकार हैं, उन विभु आदिपुरुष भगवान् वासुदेव को प्रणाम है ।। 4

देवकी के छः गर्भों का कारणभूत, गर्भ में माया विस्तार कर सप्तम गर्भ को बाहर निकाल देनेवाली, अष्टम गर्भ से परमात्मा के उत्पन्न होनेपर कंस वध के उद्घोष का रूप धारण कर मूर्त आकाशवाणी रूप में प्रकट होनेवाली, बुद्धिदात्री सहजा, आद्याशक्ति भगवती नारायणी को नमस्कार करें ।। 5

सागर सीमा तक शुभ्र यश राशि विस्तार से सुशोभित, राज्यलक्ष्मी से संयुक्त, अनिन्दितपुर में विकसित मातृवंश के साम्राज्य का आधिपत्य जिसे प्राप्त था, वह द्वादशादित्यों के प्रकाश को धारण करनेवाला सोमा कौण्डिन्यवंशी अजेय

राजा बालादित्य अत्यन्त सहज भाव से अनायास ही हाथ के कंगन के समान समस्त भूमि–मण्डल को धारण किया ।। 6

उसकी बहन की पुत्री सरस्वती को जिस विश्वरूप भट्ट ने वसिष्ठ की अरुन्धति के समान पत्नी रूप में पाया था ।। 7

उन दोनों की ब्राह्मण क्षत्रिय वर्णसंकर वंश–परम्परा में उत्पन्न द्विवेद भट्ट की पत्नी वेदवती नाम की थी ।। 8

उसकी नानी के भाई पुण्य गुणवान् शत्रुजित श्री नृपतीन्द्रवर्मन राजा का बेटा जयवर्मन था जिसने अपनी शक्ति से श्रीकृष्ण की तरह महेन्द्र पर्वत की चोटी पर नगरी बसाया था, उसकी माँ का मामा अतुल सौन्दर्यशाली, अद्वितीय राजा पुष्कराक्ष था ।। 9

जो पहले पुरि पुरि के नाम से जानी जाती थी, उसी स्वर्गद्वार नगरी में अपने कुल में श्रेष्ठ राजा श्री बालादित्य के द्वारा यह शिवलिंग स्थापित किया गया । वेद जिसकी दूसरी दृष्टि है, ऐसे उसी राजा के द्वारा (बालादित्य के द्वारा) सारे उपचारों से शिवजी की पूजा करके फैलते हुए यश के प्रकाश से दिशाओं को प्रकाशित करनेवाली स्वर्गीय प्रतिष्ठा प्राप्त की गयी ।। 10

पृथिवी के समान महिमामयी महेन्द्र देवी इन्हीं कुलीन राजाओं की महान् वंश–परम्परा में उसी तरह उत्पन्न हुई थी जैसे स्वर्ग से देवी गंगा पृथिवी पर अवतीर्ण हुई थीं ।। 11

सम्पूर्ण पृथिवी के अधिपति, वेदवती के पिता के राजकुल रूपी समुद्र से उत्पन्न चन्द्रमा के समान महनीय कीर्तिवाला श्री महेन्द्रवर्मन कुलीनों की सारी कलाओं को धारण करता था ।। 12

सूर्य जैसे पर्वतों के शिखरों पर पैर रखने का खेल खेलता है, उसी प्रकार राजाओं के मस्तकों पर पैर रखने का खेल खेलनेवाले उसी राजा महेन्द्रवर्मन के द्वारा, राज वनिताओं के मस्तकों से जिसके पैर की धूल पोंछ दी गयी है, ऐसे अपनी धर्मपत्नी से (में), राजनय का ज्ञाता राजेन्द्रवर्मन वैसे ही उत्पन्न हुआ जैसे सूर्य के द्वारा त्वष्टा की पुत्री से राजधर्म का ज्ञाता वैवस्वत मनु उत्पन्न हुआ था ।। 13

प्रारम्भ में वेदपाठी ब्राह्मण विश्वरूप से जो वंश उत्पन्न हुआ (स्थापित हुआ) तथा जिस वंश में उत्पन्न द्विवेद भट्ट ने अपनी पत्नी के साथ तीनों प्रकारों का तप किया था एवं उस सूर्यवंशियों के वंश में जिसमें अनेक राजा उत्पन्न हुए थे, उत्पन्न हुआ यह श्री राजेन्द्रवर्मन वंश के मूल पुरुष सूर्य के समान ही हुआ ।। 14

विजयी होकर जिसने अपने जयतेज के प्रकर्ष से असंख्य तेजस्वी देवताओं को नीचा दिखाया, उसी ने सारी पृथिवी का साम्राज्य, सम्पत्ति और गुणों को सम्पादित कर सूर्य आदि असह्य तेजस्वियों का जो बहुत ऊँचे पर आश्रय लेते हैं, अपने को उनका भी आश्रय बनाया ।। 15

क्षत्रिय वंशरूपी क्षीरसागर से उत्पन्न लक्ष्मीरूपी माता के तथा लक्ष्मीपति भगवान् विष्णु की तरह पिता के सूर्यवंश के सूर्य के समान वह सौन्दर्य से काम के समान ही नहीं अपितु उससे भी अधिक निर्दोष अंग सौन्दर्यवाला अनिरुद्ध प्रद्युम्न की तरह था तथा ईश्वरीय गुणों के कारण 'जर्मेश्वर' शब्द के अर्थ को पूर्णरूपेण धारण किया था ।। 16

संसार में सुन्दरता के लिए विख्यात् सृष्टि के सार रूप चन्द्रमा से अंग सौन्दर्य, प्रातःकालीन सूर्य से त्रिभुवनरूपी कमल के विकास के लिए प्रभुत्व शक्ति, अग्नि से दीप्ति तथा देवी पार्वती युक्त अपने महान् पिता शिव से जो जगत् के स्वामी हैं ईश्वरत्व को प्राप्त कर जैसे कुमार स्कन्द सभी तेज से युक्त हैं ऐसे सभी दिशाओं में प्रसिद्ध हैं उसी प्रकार कुमार राजेन्द्रवर्मन भवपुर के विख्यात् सोमवंश के मूल पुरुष से शरीर सौन्दर्य, बालादित्य नामक अपने पूर्व पुरुष से त्रिभुवन कमल के विकास के लिए प्रभुत्व शक्ति, अग्नि से दीप्ति तथा पिता से महानता तथा भवपुर में स्थित देवी सहित शिवजी से ईश्वरत्व को पाकर सभी दिशाओं में यह प्रसिद्ध था कि वह सभी तेजों से युक्त है ।। 17

देवी दुर्गा के उद्घोष से शत्रु कंस के मनोरथ को विफल करनेवाले, अपने सुदक्ष विकास के लिए यशोदा की आकांक्षा करनेवाले, इन्द्र ने जिनका अभिषेक किया था, उस श्रीकृष्ण के बाल्यकाल के समान ही दुर्ग अर्थात् किलों के संयोग से शत्रुओं के मनोरथ को विफल करनेवाले, यशदायी विकास की आकांक्षा करनेवाला राजा श्री महेन्द्रवर्मन द्वारा अभिषिक्त श्री राजेन्द्रवर्मन का बाल्यकाल सुशोभित हुआ ।। 18

सर्वत्र सामान्य की इच्छा रखनेवाले ब्रह्मा जी उस श्रेष्ठ कर्म और सत्व गुण धारण करनेवाले राजेन्द्रवर्मन में विशेष की इच्छा करते हुए समवायवृत्ति से उसके शरीर को सभी उत्तम लक्षणों को धारण करा दिया था ।। 19

जैसे सूर्य अपने किरणों के विस्तार से अन्य सभी तेजस्वियों के तेज निष्प्रभ कर देता है, उसी प्रकार अपने शरीर सौन्दर्य रूप सूर्य के किरणों के विस्तार से संसार के अन्य सभी सौन्दर्यशालियों को निष्प्रभ कर देनेवाला कामदेव इसके सौन्दर्य सागर को अपार देखकर डूब जाने के भय से ही मानो मकर वाहन किया है ।। 20

अज्ञानान्धकार नाश करनेवाली विद्यारूपी पूर्ण चन्द्र को पाकर, विद्याओं के चारों ओर फैले प्रकाश में अतिशय पैठ के कारण, विद्यारूपी चन्द्रमण्डल से छलके हुए अमृत रस से भीगी अपनी रचनाओं के रस को सभी विद्वान् रसिकों को पिलाया ।। 21

जिसके अस्त्र-शिक्षण का फैलता हुआ यश लोगों के कान और मन को सुख पहुँचाया । कर्ण के अस्त्र ज्ञान के कारण अर्जुन की जो बहुत निन्दा हुई थी वह आज भी बाद में सुनी जाती है और इसकी अस्त्र-शिक्षा के कारण हुई अर्जुन की निन्दा पहले सुनी जाती है क्योंकि इसकी अस्त्र-शिक्षा कर्ण की अस्त्र-शिक्षा से श्रेष्ठतर है ।। 22

जिसकी तलवार के एक हल्के प्रहार से मोटा लोहे का डण्डा तीन टुकड़ा हो गया उसकी तलवार के बार-बार शत्रुओं के मांस से बने शरीर पर प्रहार के विषय में क्या कहा जाये ? ।। 23

जिसके मन्त्र की शक्ति से शत्रुओं का वज्रोपम आयुध नीलकमल के दल के समान कोमल और तीक्ष्णतारहित हो गये फिर उनके कोमल शरीर के विषय में क्या कहा जाये ? ।। 24

जो विद्वान् होते हुए भी धनुर्वेद के ज्ञाताओं में श्रेष्ठ था, धनुष की डोरी के शब्द से दिशाओं का भर दिया था । उसके द्वारा धनुष के प्रयोग के समय उत्पन्न टंकार ने क्या नहीं किया ? ।। 25

बाल्यकाल में ही जिसने सभी कलाओं को निर्दोष रूप में पा लिया था

उसकी बराबरी पाने को उत्सुक चन्द्रमा बराबरी न पा सकने के कारण, आज भी कलाओं से पूर्ण होता है परन्तु तब तक वृद्ध भी हो चुका होता है, अतः पुनः बाल भाव को प्राप्त हो जाता है परन्तु आज तक अपने बाल्य भाव में सम्पूर्ण कलाओं को नहीं ही पा सका है ।। 26

सुकुमार बाल्यावस्था में ही जिसका राज्याभिषेक हुआ है तथा जो ताड़कासुर के समान तेजस्वी नाश करने की शक्ति रखता है वह सभी दिशाओं में कम्बुज सेना को उसी प्रकार ले गया जैसे देव सेना को कार्तिकेय ।। 27

मदमत्त बड़े-बड़े हाथियों से सजी जिसकी सेना की रणयात्रा से बड़े-बड़े राजा भी उसी प्रकार भयभीत हो उठते थे जैसे इन्द्र से बड़े-बड़े पर्वतराज भी डर जाते थे तथा जो ब्राह्मणों के अनुष्ठानों या ब्रह्मा के विधान से ही चारों ओर से सुरक्षित था उसने क्रोध से शत्रु नगरी को जलाकर भस्म कर दिया ।। 28

धनुष-बाण धारण कर शत्रु शरीर यष्टि को छिन्न-भिन्नकर तलवार धारण कर शत्रु सिरों को काटकर तथा गदा धारण कर शत्रु गजों के मस्तकों को पीसकर जिसने अस्त्रचालन का कठिन और अमानवीय प्रदर्शन किया ।। 29

जिस अद्वितीय वीर ने इन्द्र के द्वारा रक्षित पूर्व दिशा को जीतकर दक्षिण दिशा के लोगों को पराजित किया, साथ ही पश्चिम और उत्तर के लोगों को भी हराया, उसने केवल एक इन्द्र को ही राजसूय के लिए नहीं हराया ।। 30

आसमुद्रान्त सारी पृथिवी को जीतकर कम अवस्था के होते हुए भी युवक राजाओं को हराकर निश्चय ही जिस यशस्वी ने कम्बुजपुरी का संयोग जयलक्ष्मी से किया ।। 31

रणसागर से उत्पन्न विजयामृत से सिक्त जिसका यश कौस्तुभ मणि जो मूर्त रूप में विष्णु के हृदय को आनन्द देता था, एक साथ ही तीनों काम करता था– यश का प्रकाशन, त्रैलोक्याह्लादन और विष्णु को प्रसन्नता दान ।। 32

अपनी कलाओं से तीनों लोकों को आनन्दित करते हुए, क्रमशः बढ़ते हुए तथा बालपन को छोड़ते हुए जो साक्षात् चन्द्रमा ही हो रहा था, फिर भी बार-बार के कला क्षय को नहीं प्राप्त हुआ ।। 33

जिस प्राङ्विवाक द्वारा, यहीं ठहरो, यह आज्ञा पायी हुई आदर

करनेवाली राजलक्ष्मी से मिलने की आकांक्षा से बचपन के चिह्नों को छोड़कर नवीन यौवन प्राप्त किया गया ।। 34

दूसरे राजाओं की शोभा से बहुत अधिक सुन्दरता जिसमें बचपन में ही देखी गयी थी, उसके युवावस्था में उसी सौन्दर्य को अतिशयित करने के लिए ब्रह्मा ने बहुत यत्न किया ।। 35

दिक्पालों के विजय के समय जिस जीत से धनी हुए को (विपुल विजयवाले को) जयलक्ष्मी द्वारा आलिंगन करते देख ईर्ष्यावश, गुरुजनों के वचनों से निश्चित की गयी तथा कुल परम्परा से प्राप्त (योग्य) कम्बुज राजलक्ष्मी ने आलिंगन किया ।। 36

जिसके गज सेनाभियान के होते ही राजा लोग जल्दी से दूसरे राज्यों में भाग गये अथवा युद्धभूमि जाने पर पकड़े गये, ऐसे छः शत्रु राजाओं द्वारा जैसे प्रसिद्ध काम, क्रोध, लोभ, मोह, मद और मात्सर्य– छः शत्रुओं की इन मूर्तियों के द्वारा राज्य और लक्ष्मी को धारण कर मानो अतत्पुरुष समास द्वन्द्व का जिसने प्रयोग किया अथवा वे सभी छः उन राज्यलक्ष्मियों के पुरुष न थे– ऐसा प्रमाणित किया ।। 37

राज्याभिषेक विधियों के अंतर्गत जिसके शरीर पर अभिषिक्त तीर्थों का जल जितनी देर में सूखा उतनी ही देर में शत्रु नारियों के होठों में लगा रंग भी सूख गया (उड़ गया)।। 38

शिवजी के माथे का अलंकार बने नव चन्द्रबिम्ब को देखकर ही मानो ईर्ष्या से नव सूर्यबिम्ब जिसके मुकुट का मणि बनकर शिवजी के चूड़ामणि का सौन्दर्य पा लिया ।। 39

सारी पृथिवी के भार को धारण करनेवाले सर्पराज ने अपने सहस्रों फणों पर चमकनेवाले रत्नों को निकालकर जिसके स्वर्णाभूषणों में निश्चय ही भार कम होने की खुशी से ही गाँथ दिया है ।। 40

देखने की इच्छा से व्याकुल स्त्रियों के निमेष रूप राहु के द्वारा ग्रसित किये गये अंगकान्ति रूप चन्द्रमा को देखकर विष्णु के चक्र के क्रोध की तरह जिस लाल आँखोंवाले का रूप सौन्दर्य, देखने की इच्छा रखनेवालों ने देखा ।। 41

तीनों लोकों के कल्याण के लिए जिसके शासन में आरूढ़ होने पर कश्यप की पुत्री पृथिवी, जो अदिति को अतिशय प्रेमास्पद हुई थी तथा इस मन्वन्तर में इन्द्र जैसे रक्षक की थी, इन्द्रादि की सम्पत्ति में सम्मिलित न हुई ।। 42

जिस राजा को सिंहासन स्थित देखकर पुलकित पृथिवी अतिशय सौन्दर्य को धारणकर (सुसज्जित हो) जिसके साथ स्वयं ही सिंहासन पर आ बैठने पर ऐसा लगता था मानो राम से सौन्दर्यशालिनी सीता को राजा होते हुए भी इसने चुरा लिया है ।। 43

रत्नों से सुसज्जित जिसके विस्तृत सुवर्ण दण्ड को तथा संसार में एक ही था, ऐसे शुभ्र चाँदी के छत्र को लोगों ने सोने के मेरु पर्वत और उसके ऊपर आये सम्पूर्ण चन्द्रबिम्ब का सज्जनों की भक्तिरूपी जल में पड़ा प्रतिबिम्ब ही माना ।। 44

निर्विकार स्वभाववाली धरती में भी यह विकार देखा गया कि उस राजा के चरणों में झुके शत्रु राजाओं के मुकुटमणियों से पृथिवी सोने की बनी सी और रत्नों से भरी सी दिखलाई पड़ने लगी ।। 45

राजाओं के तेजोद्दीप्त मस्तकों पर जिसकी तेजोमयी, आनन्ददायिनी और ज्वलनशील (कठोर) आज्ञाएँ थीं, वह आग, सूर्य और चन्द्रमा के एकत्रित समूह के समान ही लोकों में सुना गया ।। 46

दूसरे राजाओं को जो राज्यसुख भोग विवेकहीन पागल बना देता था, वही उसे शान्त अर्थात् निर्कांक्ष कर देता था; क्योंकि वृष्टि का जल नदी में बाढ़ ला देता है, समुद्र में नहीं ।। 47

पृथिवी पहले राजन्वती कहलाती थी, परन्तु संस्कृत व्याकरण नियम के अनुसार पदों में निपात (नाश) पूर्व के वर्णों के होने के कारण राजन्वती से राजाओं का नाश कर तथा वृद्धि पीछे (पद के पीछे) होने के नियम के अनुसार अपने शासन के द्वारा धराधर शब्द को सिद्ध किया । अर्थात् राजाओं का नाश कर अपना शासन स्थापित कर धराधर पद में धारण करनेवाले अर्थात् अपने में वृद्धि की ।। 48

पृथिवी पर अपने कुल के सिलसिले से भी और भावी राजाओं से

प्रकाशित राजविद्या को पाकर जिसने विशेष प्रकाशित किया दोपहर को जैसे अन्धकार को सूर्य की किरण दूर कर देती है ।। 49

पहले एक ही कन्या (लक्ष्मी) से विवाह कर जो स्वर्ग में परमेश्वर हुए, परन्तु पृथिवीश्वर नहीं हुए, वही बाद में पृथिवी पर पृथिवीपति होकर अधिक लक्ष्मी से विवाह करने की इच्छा से सौ कन्याओं से विवाह कर स्वर्ग से पृथिवी अधिक है, यह सिद्ध किया ।। 50

राम को भ्रान्तिवश टूटा हुआ और कोमल धनुषवाला तथा राज्य से हटा गया समझकर शत्रुओं ने उनकी लक्ष्मी जानकी को चुरा ली थी परन्तु इस मज़बूत और बिना टूटे धनुषवाले और राज्य में दृढ़ स्थितिवाले की लक्ष्मी को न चुरा सके ।। 51

मानो सभी युवकों को नीचा दिखाने के लिए ही जिस युवक ने नवयौवन धारण करते हुए नवयुवतियों के मन में कामेच्छा देकर भी अपने मन को शान्ति दी ।। 52

जिसकी युवावस्था की बढ़ती हुई सुन्दरता समयरूपी चन्द्रमा के बढ़ने के साथ ऊँचे-ऊँचे उठते समुद्र की लहरों के समान जैसे-जैसे बढ़ती गयी, वैसे-वैसे गुणरत्नों का ढेर दिखता गया ।। 53

इन्द्र के वैभव से भी अधिक वैभव से घिरी, अनेक देवताओं से भरी हुई के समान, अनेक विद्वानों से भरी हुई स्वर्ग में सजनेवाली धर्मचर्चा की सभा सुधर्मा की तरह ही पृथिवी पर जिसकी भरी हुई राजसभा थी ।। 54

धर्म, अर्थ और काम का सार्थक संयोग कर एकनिष्ठ हो महान् फलवाले एक वर्ग की तरह एक किये हुए त्रिवर्ग का जिसने सेवन किया ।। 55

तीनों कालों की जानकारी रखनेवाले शिव विष्णु का जो साक्षात् नरेन्द्र रूप था, फिर भी रहस्य जानने में चतुर गुप्तचरों को अपनी आँख बनाकर सूर्य की तरह सभी दिशाओं में फैला रखा था ।। 56

इधर-उधर फैले तथा दूसरों से अधिकृत गुण भी जिस गुणरत्न समुद्र के पास गाम्भीर्य के कारण स्वयमेव चले आये, वैसे ही जैसे सभी जलचर प्राणी जल के एकमेव पात्र समुद्र के गाम्भीर्य के कारण उसके पास पहुँच जाते हैं ।। 57

जो वृद्ध वाक्य, उपमा, अनुमान, अर्थापति, उपलब्धि, प्राक् और प्रध्वंसाभाव– इन छः प्रमाणों से, कर्तव्य, सत्, असत् तथा अन्य सब जानने योग्य को जानकर ही कार्य करता था ।। 58

स्वच्छ जल की दीर्घिका के समान सभी दिशाओं में स्थित समुद्रवाली, दिक् कुञ्जरों से खेलनेवाली, विकसित कमल के समान नेत्रवाली, पूर्ण चन्द्रमा के समान मुखवाली, दिशा रूप लक्ष्मी मानो साक्षात् शरद ऋतु का रूप धर जिसकी सेवा करते हैं । शरद के आने पर तालाबों का जल स्वच्छ हो जाता है, हाथियों का संचार बढ़ जाता है, कमल खिल उठते हैं तथा चन्द्रमा पूर्ण शोभाशाली हो जाता इन सभी लक्षणों से युक्त दिशाएँ जिसकी सेवा में लगी अर्थात् ऐसी सभी दिशाओं पर जिसका अधिकार हो गया ।। 59

धर्म के द्वारा देवताओं (अथवा विद्वानों) का मनोरथ सिद्ध करनेवाला, शत्रुओं का मनोरथ नष्ट करनेवाला, विद्याधन से धनी, उसका उद्योग, विजय से उसी प्रकार संयुक्त था जैसे गौरी से शंकर ।। 60

कमलों के विकास में जिसकी किरणें लगी रहती हैं, फिर भी वह सूर्य युक्तिपूर्वक रात्रि के अन्धकार को हटाकर संसार की समृद्धि के लिए घोड़े के रथ पर सवार हो उपासकों की मंत्रस्तुति करता है उसी प्रकार पद्मोदय में शक्ति को लगाये रखने पर भी युक्ति से अपराध के अवसरों को (दोषों को) दूर कर संसार की समृद्धि के लिए इन्द्रियरूपी अश्वों का नियमन कर मन्त्रियों से उत्तम मन्त्रणा को जो स्वीकार करता था ।। 61

समुद्र गम्भीर गतिवाले होते हैं, उनकी संख्या चार हैं जो दिशाओं में फैले होते हैं, पर्वतों को भी डुबानेवाले होते हैं, अपनी लहरों के फैलाव से कालिमा बढ़ानेवाले होते हैं, लक्ष्मी की जन्मभूमि हैं तथा पृथिवी को रत्नों से भरनेवाले होते हैं उसी तरह जो राजा चार की संख्यावाली चतुरंगिणी सेना सभी दिशाओं में फैली है, राजाओं को नाश करनेवाली, रणाभियान में धूल उड़ाकर अंधेरा फैला देनेवाली, जयलक्ष्मी को जन्म देनेवाली तथा रत्नों से राजकोष को भरनेवाली सेना से युक्त होकर समुद्र की समतुल्यता पाने का चतुर उपाय करने पर भी समतुल्यता न पा सका क्योंकि समुद्र जड़ जल का समूह है और यह चेतन है ।। 62

जिसके मेघ के समान गम्भीर वाणी से रणयात्रा का आदेश सुनकर चारों दिशाओं से सेना उसी प्रकार बढ़ चली जैसे तुरन्त हुई वर्षा के कारण नदियाँ उफनाकर बढ़ आती हैं ।। 63

कालक्रम से शरद ऋतु के बीत जाने पर दिशा मण्डली में अपने स्थान को पायी हुई हेमन्त लक्ष्मी जिस योग्य को निकट से अभिषेक करने के लिए अथर्ववेद में बतायी गयी सिद्धि की तरह ही हुई ।। 64

सोने के समान रंगवाले सुन्दर ध्वनिवाले पुरोहितों द्वारा दिये गये (छींटे गये) हवनीय द्रव्य को ग्रहण करनेवाले, गोल घूमते हुई लपटोंवाली अग्नि और सुन्दर रंगवाले, छत के आँगन में फैलाये गये अन्न को ग्रहण करनेवाले शिखा जिनको है, ऐसे मोर जिसके जयकार को उच्च शब्द से करते थे ।। 65

पहले क्षीणता को प्राप्त हुई पुनः अमृतधार से वृद्धि को प्राप्त हुई शोभा को धारण करनेवाला चन्द्रमा एक सूर्यबिम्ब के द्वारा ही वृद्धि को प्राप्त कर लेता है परन्तु यह चन्द्रमारूपी राजा सौ सूर्यबिम्ब की तरह सौ स्वर्णकलश से प्रति पुष्य नक्षत्र में अभिषिक्त हो ऐसी वृद्धि को पाया है कि जो क्षीणता और अभाग्य से रहित है, वास्तव में यह चन्द्रमा बड़ा भाग्यशाली है ।। 66

बिना आभूषणों के ही निःसर्गतः जो पहले से ही श्रेष्ठ सुन्दर था सभी आभूषणों को धारण कर और भी सुन्दर हुआ था– यह किसी को भी सौन्दर्य-प्रशस्ति को पोछने के लिए पर्याप्त था ।। 67

जिसके अंगकान्ति की सत्य उपमा होने के लिए आइने के तल में बैठा सूक्ष्म प्रतिबिम्ब बना काम का सौन्दर्य असमान सामर्थ्य के होने के कारण मिथ्योपमा हो गया, क्योंकि बिम्ब सत्य होता है और प्रतिबिम्ब मिथ्या एवं स्वसामर्थ्यहीन होता है ।। 68

सम्पूर्ण पृथिवी को लाँघ जाने में (जीतने में) जिसने त्रिविक्रम भगवान् विष्णु के समान विक्रम दिखाया, परन्तु पृथिवी पर बताये गये धर्माचाररूपी अर्गला का उल्लंघन नहीं किया ।। 69

इन्द्रियरूपी सात घोड़ों के रथ पर सवार उदयाद्रि के समान दयाद्रि से यात्रा आरम्भ करनेवाला जो नया सूर्य चमक रहा था, वह दिशाओं में फैले

अन्धकाररूप शत्रुओं के लिए भयकारक था ।। 70

रणयात्रा के प्रारम्भ में निष्पाप श्रेष्ठ ब्राह्मणमण्डली से स्पष्ट उच्चरित आशीर्वचनरूप किरणों से संयुक्त हुआ जो चन्द्रमा के समान सुशोभित हुआ ।। 71

शत्रु को जीतने की इच्छा से हाथी-घोड़ों से भरी सेना के पीछे चलते हुए जिसने भाग्य और शक्ति के एकत्रित योग का दृश्य उपस्थित किया था ।। 72

आक्रमण के क्रम में जो पृथु की लक्ष्मी के लिए ब्रह्मलोक को भी नष्ट कर दिये रहा उसे देखकर ही मानो जल्दी स्वर्ग की (विष्णुलोक) धन सम्पदा को लाने के लिए ही धरती पृथिवी सैनिकों के पैरों से मर्दित हो धूल का रूप ले उड़कर विष्णुपद अर्थात् आकाश में पहुँच गयी ।। 73

शत्रुसेना में समान व्यूहबद्धता होने पर भी जिसकी (उसकी) सेना ही शक्तिशाली दिख रही थी क्योंकि स्फटिक मणि, पद्मराग मणि के प्रतिबिम्ब से युक्त होने पर गाढ़े लाल रंग का दिखलाई तो पड़ता है परन्तु पद्मराग की कान्ति उसमें नहीं आ पाती है ।। 74

जिस पृथिवी जीतने की इच्छा रखनेवाले के धनुष से वर्षा की तरह छूटे बाण गम्भीर स्वर से गरजते हैं, उसके दूर की रत्न प्रभु पृथिवी भी निकट हो जाती (अर्थात शत्रुओं की भूमि भी अपनी हो जाती है) जैसे मेघ घिर जाने पर दूर की भूमि भी निकट दिखलाई पड़ने लगती है ।। 75

ब्रह्मा के कुल में उत्पन्न, बाहुबल से अर्जित की गयी जिसे प्राप्त करने से शत्रुओं ने रोका है, क्षत्रियों से संबंधित पृथिवी को दूसरों के बाहुबल से युद्ध में अप्राप्य होने को देख जानकर जिसने दूसरे ही रास्ते से उसे अधिकृत किया ।। 76

युद्ध में मारे गये शत्रु रक्तरूप नव किसलय की उत्पत्ति से सुसज्जित रणभूमि में जिसकी शौर्यवृद्धि ने पूर्ण बसन्त सम्प्राप्ति के द्वारा काम की शक्ति वृद्धि करने की तरह अस्त्र शिक्षा (ज्ञान) की वृद्धि की ।। 77

सन्ध्या की पीली लाल आभा से रंगे पर्वतों के समान सिन्दूर से चित्रित शत्रुओं के हाथियों के मस्तकों से जिस तेजस्वी के हाथ की तलवार की मार से मोतीरूपी तारागणों की पंक्ति झड़ी थी या तलवार की मार ने मोतीरूपी तारागणों की पंक्तियाँ गिरायी थीं ।। 78

जिसने शत्रुओं को शीघ्र मार गिराने के लिए स्वर्गीय पेय के लाल रंग (रक्त) को तथा श्रेष्ठ बाणों के प्रवाह रूप मोतियों की लड़ियाँ फैलाया था, उससे रणभूमि प्राप्त हुई जयलक्ष्मी सुन्दर वस्त्र के समान सुशोभित हुई ।। 79

मारे गये अतिशय वीर शत्रुओं के शरीर यष्टियों को पिरोकर उछालती हुई दिशाएँ नाचती हुई जिसकी सेना, ताड़कासुर के शरीर को मारकर दिशाओं में नाचती हुई स्कन्द कार्तिकेय की सेना की तरह देवताओं के द्वारा क्रोध (द्वेष) से नहीं प्रेम से देखा गया ।। 80

सप्तद्वीपोंवाली सम्पूर्ण पृथिवी का एकमात्र दीपक (प्रकाशक) बनने की इच्छा वाले का उज्ज्वल धारवाले तलवार पर युद्ध में मारे गये शत्रुओं के रक्त से लालिमा विराज रही थी मानो प्रज्वलित कीर्ति से निकलती हुई लौ हो ।। 81

रण में गदा के प्रहार से पीस दिये गये शत्रुओं के श्रेष्ठ हाथियों के दाँतों के चूर्ण को रणभूमि में ही प्रेमासक्त हुई शत्रु लक्ष्मियों के केशों में केतकी पुष्प के पराग की तरह जिसने फैलाया था ।। 82

युद्ध में जो तेज अस्त्रों के प्रहार में तेज अस्त्रों के प्रहार से भीष्म को गिरा देनेवाले अर्जुन के समान, शत्रु प्रहार को रोकनेवाले योद्धाओं में सूर्यनन्दन कर्ण का प्रहार रोकनेवाले युधिष्ठिर के समान तथा शत्रु का अन्त कर देनेवालों में युद्ध के अन्त में गदा से चोट खाये दुर्योधन के जंघे पर प्रहार कर अन्त कर देनेवाले भीम की तरह था ।। 83

शत्रुओं द्वारा फेंके गये अस्त्रों के प्रति फेंके गये जिसके अस्त्र समूहों के बादल के कारण हवा रुक जाने से रणांगन की बढ़ी हुई गर्मी से तप्त हुआ जिसने अपने तेज चलते हुए तलवार रूप पंखे से गर्मी दूर की थी ।। 84

हाथ में तलवार धारण करनेवाले जिसने भागे हुए तथा हारे हुए शत्रुओं पर कृपा करके युद्ध छोड़कर गंगा में जा छिपे दुर्योधन पर कृपा न करनेवाले पाण्डवों को भी जीत लिया था ।। 85

गोकुल की रक्षा की इच्छा से अपनी भुजाओं से गोवर्धन को उखाड़कर स्थिर रूप से धारण करनेवाले कृष्ण की तरह ही संसार के कल्याण की इच्छा से जिसने अपनी भुजाओं से सारे राजाओं को उखाड़कर अनेक काल तक अपना दृढ़

शासन कायम रखा ।। 86

शत्रुओं की स्वर्गगत आत्माओं के स्वर्ग से लौटने की भविष्यम्भावी परिस्थिति के भय से जिस तेज तलवार से घात करनेवाले के हाथों से जगह-जगह काटे गये तथा निश्चल किये गये अपने ही शरीर को देखकर प्रेत होने की शंका की जबकि स्वर्गीय सुन्दरी अप्सराओं से घिरी हुई थीं ।। 87

आश्चर्य है कि युवा काल में ही इतना संयमित मन (हृदय) का है कि अपने हृदय को एक बार भी दूसरे की नारी के लिए नहीं दिया इस विपरीत भाव को देखकर शत्रु राजलक्ष्मियाँ रणभूमि में सीधे उसके हृदय में ही प्रविष्ट हो गयीं ।। 88

कामदेव को जला देनेवाले शिवजी के विशाल वक्षस्थल से आलिंगन कर जैसे पार्वती अपने सहज सौभाग्य को प्रकट कर रही थीं, उसी प्रकार जिस विजेता के विशाल वक्षस्थल से आलिंगन कर जयलक्ष्मी अपने सौभाग्य को उदाहृत करती हुई जिस तेज तलवार के धार वाले को भी प्रेमयुक्त बनाया (कोमल हृदय बनाया)।। 89

जिस नवयौवन से अलंकृत शरीरवाले तथा पृथिवी पर की सारी लक्ष्मियों के एकमात्र आश्रय रूप जिस नवयौवन से अलंकृत शरीरवाले को देखकर देवी लक्ष्मी पुरुष पुरातन विष्णु से अपने व्यर्थ पुराने प्रेम की निन्दा की ।। 90

रण में प्राणों की भीख माँगनेवाले अनेक शत्रु वीर पकड़कर छोड़ दिये गये जबकि विष्णु के बल से बाँधा गया बलि राजा को इन्द्र डरपोकों की तरह आज भी नहीं छोड़ता है ।। 91

गजेन्द्र के दोनों दाँतों से ज़ख्मी कन्धेवाले प्रतिघात करने में असमर्थ सिंह की तरह हुआ जो शत्रुओं की शक्ति को शक्ति से नहीं, युक्ति से नाश करनेवाला हुआ ।। 92

जिसके शत्रु राजाओं में सिंह के समान होते हुए भी युद्ध में अस्त्र फेंककर जंगली हाथी से डरे हुए सिंह के समान फिर वन में ही हिरणी के बच्चे की तरह तेजी से भाग निकले ।। 93

जिसके तेज रूप अग्नि की जलन से व्याकुल हो कुछ शत्रु तो समुद्र में डूब गये और कुछ यह सोचकर कि यह अपेक्षाकृत शीतल है, दावाग्नि में प्रवेश कर गये ।। 94

जिसके शत्रु नारियों की शोकरूप अग्नि आँखों से निरन्तर प्रवाहित आँसुओं से भीगे वैधव्य दु:ख से दुखी मन वालियों को गीली लकड़ी की तरह एक-एक बार जलाया ।। 95

हंस उजले छाते के समान शोभा पानेवाले वनैले हाथी, समुद्र तक पालनेवाले, 'राज' शब्द धारण करनेवाले (राजहंस) हंस से हंसराज हुए थे, जिसके वचन से सिंह तो शत्रुओं की पुरी को राजलीला सहित के समान मानो प्रसन्नता बिखरते हैं ।। 96

जिसके प्रताप के तेज से जलकर नष्ट होकर विनाश समुद्र में डूबी शत्रु धरती यद्यपि महावराह के दाँतों के द्वारा समुद्र से निकली हुई थी, परन्तु इसके द्वारा पुन: डुबाये जाने के बाद आज तक नहीं निकली ।। 97

नगाड़े की ध्वनि से भरी हुई दिशाओं में बड़े उच्च स्वर से की गयी जिसकी जयघोषणा की घोर ध्वनि लहरियों की नकल करने के लिए नदीपति सागर आज भी गरज रहा है ।। 98

जिसकी कीर्ति से समुज्वलित उदात्त गीतों के कारण अन्य सभी के यशों का प्रकाश दूर हो जाने पर लज्जा से सम्मिलित हो गाये जाने पर उपगीत ही होकर रह गये ।। 99

अपनी सौत कीर्ति में अपनी चंचलता को छोड़कर जिसको प्रतिरूप में पाकर दूसरे को प्राप्त करने की लज्जा से लक्ष्मी गम्भीर हो गयी थीं मानो जनन सम्बन्ध से समुद्र से गम्भीरता चुरा लायी थीं ।। 100

चंचलता से लक्ष्मी को, दया से आँसू को, शत्रुओं से भय (द्वेष) को तथा मनुष्यों से मरण को दूर करने का उपाय जानने में समर्थ वह राजा दिक्पत्नियों से अपनी कृति को छुड़ाने में समर्थ न था ।। 101

चारों समुद्ररूपी चारों स्तनों से रत्न दुग्ध की धारा प्रवाहित करनेवाली, प्रतिवर्ष प्रसव करनेवाली, वेदपाठी ब्राह्मण ही जिसके बछड़े हैं, ऐसी धरतीरूपी

गाय को जिसने यज्ञ के लिए दूहा ।। 102

श्रद्धाभक्तिरूपिणी, एकान्त भाव से भगवान् विष्णु के चरणों में आश्रय पानेवाली, ब्रह्मदेव के कमण्डल से आगे निकलकर बहती हुई गंगा और यमुना नाम पानेवाली देवनदियों की शोभा के समान प्रतिदिन बढ़ती हुई जिसके यज्ञारम्भ की शोभा थी ।। 103

जिसके यज्ञ में हुत पदार्थों का अनुमान करा देने के लिए अत्यन्त घना होकर धूम दिशारूपी द्वार से आह्वान के मन्त्रों के साथ स्वर्ग गया ।। 104

इन्द्राणी के जिन बालों में इन्द्र की सदा उत्कण्ठा बनी रहती थी उनमें लगा पारिजात पुष्प उतना सुन्दर नहीं हुआ जितना सुन्दर निरन्तर चलनेवाले जिसके यज्ञों में देवताओं द्वारा ऊपर से गिराये गये पारिजात पुष्प थे ।। 105

चारों ओर गोल घूमती हुई लपटोंवाला जिसमें हवन किया जा चुका है ऐसी अग्नि चारों ओर घूमते रहने पर जिस स्थिर की दिशाओं में घूमते हुए यश को नहीं जला सकी ।। 106

मीमांसकों द्वारा वर्णित यज्ञकृत्यों का सुफल स्वर्ग को जिसने अपने दिव्य सुख भोगों के द्वारा प्रत्यक्ष कर यज्ञ विद्या के ज्ञाता तथा वेदवाणी को सत्यापित किया था ।। 107

दिशाओं में विद्यमान नगर, समुद्र, सुमेरु पर्वत, नग वनादि निश्चय ही बेकार के पानी, पत्थर और हाथी के बच्चे के अवशेष हैं– यह सोचकर उसे स्वीकार किया जाये– इस वचन के साथ असंख्य रत्न दिशाओं में दान किया ।। 108

याचकों की बढ़ती हुई संख्या के साथ क्रमशः जिसने दान-प्रवाह को बढ़ाया था, वह मानो स्वर्ग जाने के इच्छुकों के लिए सीढ़ियों का सिलसिला हो गया ।। 109

शौर्यादि गुण समूह भी शायद गुणी का अनुकरण करने के लिए अच्छे-बुरे का विचार कर दुष्टों को छोड़ते हुए तथा अच्छों का आश्रय लेते हुए जिस घमण्ड छोड़े हुए को सुशोभित किया ।। 110

क्योंकि प्राचीन काल में भी मधुकैटभादि प्रबल भयकारक दुष्ट हुए थे अत: जिसने दुष्टरहित कर राष्ट्र का शासन करते हुए कभी नहीं पढ़ा गया योगशास्त्र का अध्ययन किया ।। 111

जिसकी सुन्दरता, गुणसमूह, यश, धैर्य, बुद्धि तथा शक्ति और कृति की विशिष्ट वृद्धि श्रेष्ठ स्तर की होती हुई भी पुनः-पुनः नवीनता और अनन्तता को प्राप्त हुई थी ।। 112

मारे गये शत्रुओं की चर्बियों से दिशाओं में विस्तृत हुए क्षेत्रवाली (अंगवाली) पृथिवी को ढक देने के लिए शत्रुलक्ष्मी के केशपाश में सजे माला के फूल की तरह जिसने अपने यशरूपी फूल को बिखेरा था ।। 113

राजमहल के मध्य में स्थित सुवर्ण रत्न से बने कक्षवाले पारिवारिक घर में स्थित जिस तेजस्वियों में अग्र के अधार्मिकों की पीड़ा से रहित हुए राज्य में निवास करती हुई प्रजा स्वर्ग में निवास करने की तरह ही आनन्दित थी ।। 114

व्याप्त तेजरूपी अग्नि के पास कही गयी जिसकी अभिलक्षित शुभ्र कीर्तिगाथा ऐसी लगती थी मानो सभी कामनाओं को देनेवाली सामधेनी मन्त्र अपना अभिप्राय कहता हो ।। 115

तीनों लोकों को बचाने (रक्षण) के लिए कलिकाल की संहारिणी वेला में लोककल्याण के लिए सब नृत्य दिखाते हुए सब का निर्वाह किया जिसने शिव के ताण्डव नृत्य में चतुरता का ज्ञाता था ।। 116

कलिकाल के कल्लभ से कलुषित त्रिलोकी की रक्षा के लिए शिवजी के ताण्डव नृत्य की दक्षता से युक्त अपने सम्पूर्ण नृत्याभिनय को प्रदर्शित करते हुए भी जिसने पृथिवी की स्थिरता को धारण किया ।। 117

उच्च पद पाने की उत्कट इच्छा रखनेवाले तथा चरणों की शरण से दूर हुए शत्रु राजागण पार्थित्व (रजत्व और राजत्व) इस समान धर्म के होते हुए भी जिसके शत्रु राजागण तो भय से पर्वतों के उच्च शिखरों पर जा बसे तथा चरणों की धूल बड़े-बड़े राजाओं के मस्तकों पर जा बसी ।। 118

लजीली नवेली की तरह शत्रु सेना तो मुँह घुमा ली परन्तु साध्वी से सौतिया ईर्ष्या रखनेवाली केलि रस को जानने वाली प्रौढ़ा दासी की तरह शत्रु

लक्ष्मी रण केलि के समय जिस योद्धा की छाती से आ लगी ।। 119

सज्जनों के पापरहित मन को तथा दुर्जनों के स्वभाव से अति कठोर मलिन मन रूप लोहे को जिसने चुम्बक की तरह आकर्षित किया ।। 120

जिसके युद्धप्रयाण के समय समुद्र में श्वेत पालों से निबद्ध नौका पंक्ति गंगा की लहरों पर फैले हंसों की पंक्ति के समान सुशोभित हुआ ।। 121

समुद्ररूपी सुन्दर साड़ी की लहररूपी आंचल के उठ जाने से प्रकट हुई रत्नराशि ही जिसकी चमकीली कमरधनी की लड़ियाँ हैं तथा विशाल पर्वत ही जिसके विपुल नितम्ब– ऐसी तापहरण मुखवाली पृथिवी को जिसने प्रेमपगी रमणोन्मुख नारी की तरह बनाया ।। 122

तीनों भुवनों में बिखरी जिसकी कीर्ति को.........स्तुति । दुर्बल रहने पर भी तप से गंगा को भगीरथ के समान मानो वहन किया, प्राप्त किया था ।। 123

सभी वर्णों के लोगों को विभिन्न पदों पर स्थापित कर उन्हें अनेक कार्यों से लगानेवाला, दण्ड और पुरस्कार के विकार को समझनेवाला जो स्वयं लाभ–हानि के विकार से उसी प्रकार मुक्त था जैसे विभिन्न वर्णसमूहों से बने पदों में क्रिया पद का योग करनेवाले तथा आगम, लोप और विकार के व्याकरण के नियम को जाननेवाले वैयाकरण स्वयं लोप और आगम के विकार से मुक्त रहते हैं ।। 124

